DIPLOMA IN SANSKRIT

**Paper - IV (Part - B)**

# ISHAVASYOPANISHAD

## ( WITH SHANKARABHASYAM )

**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha

Tirupati - 517 501(A.P.)

# UNIT-I
# ईशावास्योपनिषत्

**संरचना**

१.०. परिचयः
१.१. लक्ष्याणि
१.२. ईशावास्योपनिषत्- परिचयः
१.२.१. उपनिषत्-निर्वचनम्
१.२.२. उपनिषत्-प्रतिपाद्यं वस्तु
१.२.३. ईशावास्योपनिषत्-विषयसङ्ग्रहः
१.२.४. ईशावास्योपनिषत्- वैशिष्ट्य
१.३. उपसंहारः
१.४. अभ्यासः

## १.०.परिचयः

वाङ्मयं द्विविधम् लौकिकम् अलौकिकम् चेति। तत्र लोकेन = जनेन = पुरुषेण निर्मितं लौकिकं भवति। तत् वाल्मीकि-व्यास-कालिदासादिरचितं वाङ्मयम् भवति। न लौकिकम् = न पुरुषेण निर्मितम् = अपौरुषेयम्, अलौकिकम् भवति। तत् वेदसम्बन्धि वाङ्मयम् भवति। तदेव वैदिकवाङ्मयपदेनापि व्यवहृतो भवति। वैदिके वाङ्मये ऋक्-यजुष्- साम- अधर्वणाख्याः चत्वारः वेदाः भवन्ति। एते च वेदाः संहित-आरण्यक- ब्राह्मण-उपनिषद्भेदेन चतुरः भागान् वहन्ति। तत्र प्रति वेदस्य अपि चतुर्थः भागः उपनिषत् भवति। संहित-आरण्यक- ब्राह्मण- उपनिषत्सु चतुर्षु भागेषु उपनिषत् भागः अन्तिमः । यतः उपनिषत्, वेदस्य अन्तिमः भागः जातः ततः उपनिषदः वेदान्तपदेनापि व्यवहारम् आप्ताः। उपनिषदश्च प्रतिवेदं भिन्नाः । अत्र च उपनिषदां सामान्यः सङ्क्षिप्तश्च परिचयः लभ्यते।

## १.१.लक्ष्याणि

भारतदेशः शान्तिकामुकः।विश्वस्य शान्तिसमुपार्जनाय सततं स्वीयं स्वच्छन्दं प्रयत्नं आचरत्येव। एषः प्रयत्नः अनादिकालतः निरन्तरायं प्रचलत्येव। भरतभूमिः वेदभूमिः।वेदाः अत्र अवतरिताः।विश्वजनीनाः सार्व कालिकाः, सार्वत्रिकाः विषयाः बहवः अत्र विद्यन्ते।ते च विषयाः मानवेषु देशातीतम्, मतातीतम्, जात्यतीतं च मानवसौभ्रातृत्वं वर्धयन्ति। प्रकृत्याराधनाभावं जनयन्ति।पर्यावरणमहिमानं ख्यापयन्ति। 'आत्मवत् सर्भूतानि' इति भावनां मनस्सु स्थापयन्ति।तादृशानां वेदभागानाम् अध्ययनम् मनुजान् संस्कारवतः करोति। नागरिकान् करोति। नागरिकः समाजः शान्तियुतसहजीवनम् आचरति। विश्वशान्तिसम्पादकानाम् एषां विषयाणाम् अवगमनार्थम् अयं पाठ्यांशः उद्दिष्टः। एतत्पाठ्यांशस्य अध्ययनेन -

- वेदानाम् उद्देशं पठितुं प्रभवति।
- वेदानाम् विभागन् लिखितुं समर्थो भवति।
- उपनिषदः स्वरूपं भाषितुं पारयति।
- उपनिषदः प्रतिपाद्यं वस्तु लिखितुं पारयति।
- ईशवास्योपनिषदः स्वरूपं पठितुं समर्थो भवति।
- ईशवास्योपनिषदः वैशिष्ट्यं भाषितुं प्रभवति।

## १.२. ईशावास्योपनिषत्- परिचयः

### १.२.१.उपनिषत्-निर्वचनम्

उप + नि, इति उपसर्गद्वयपूर्वकात् 'षद्लृ' धातोः क्विप् प्रत्यये कृते 'उपनिषत्' पदं निष्पन्नम् । 'षद्लृ' धातोः विशरण-गति- अवसादनानि च अर्थाः। तत्र विशरणं नाम नाशनम् । गतिः नाम प्राप्तिः। अवसादनं नाम शिथिलीकरणम्। उप इति उपसर्गः प्रयत्नस्य माध्यमत्वं सूचयति। तथा च उपनिषत्-

- प्रयत्नशीलस्य उपासकस्य वा साधकस्य वा अविद्यां नाशयति।
- प्रयत्नशीलं उपासकं, ब्रह्मणः वा आत्मनः वा साक्षात्कारं प्रापयति उजनयति।
- साधकस्य आधिभौतिक- आध्यात्मिक-आधिदैविकस्य च दुःखत्रयस्य तापं शिथिलयति = अपाकरोति।

एवञ्च यः वेदभागः अविद्यां नाशयति,आत्मनः वा साक्षात्कारं जनयति, दुःखत्रयस्य तापं अपाकरोति सः' उपनिषत् (ग्रन्थः) भवति।

### १.२.२.उपनिषत् - प्रतिपाद्यं वस्तु

उपनिषत्सु मुख्यतया प्रतिपाद्यः विषयः ब्रह्म तथा जीवश्च। आधिभौतिक- आध्यात्मिक - आधिदैविकस्य च दुःखत्रयस्य तापात् मोचनम् एव उपनिषदां परमं लक्ष्यं भवति। तच्च यथार्थज्ञानतः सम्भवति।यथार्थज्ञानद्वारा जीव - ब्रह्मणोः ऐक्यम् अवगच्छति। ब्रह्मातिरिक्तस्य अन्यस्य पदार्थस्य सत्ता एव नास्ति। अतः'अहं ब्रह्मास्मि' इति अनुभूतिमेति।ब्रह्मैव बुद्धिभेदेन भिन्नभिन्नरूपेषु प्रतिभासितं भवति। अतः जगतः तत्त्वं ब्रह्मैव इति अवगच्छति। सिद्धान्तपरतया उपनिषत्सु सर्वास्वपि जगत्, ब्रह्म, ईश्वरः, पुरुषः ,जीवः, आत्मा, प्राणः, मनः,सृष्टिक्रमः, अविद्या, बन्ध,मोक्षादिविषयाणां विवेचनम् अत्र भवति।

एवं विशिष्टवस्तुप्रतिपादकाः एताश्च उपनिषदः एकैकस्य वेदभागस्य कृते एकैकतया आहत्य १,१८० उपनिषदः सन्ति। तासु १०८ प्रधानाः । तत्रापि १०) दश उपनिषदः अतीव प्रधानाः। ते च -

**ईश-केन-कठ- प्रश्न-मुण्ड-माण्डूक्य -तित्तिरिः।**
**ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा।।**

इत्यनेन श्लोकेन सूचिताः। अतीव प्रधानासु च दशसु उपनषत्सु ईशावास्योपनिषत् प्रथमा भवति।

### १.२.३.ईशावास्योपनिषत्

अस्याः प्रथममन्त्रे, प्रथमं पदं 'ईशावास्यम्' भवति। अतः प्रथमेण तेनैव पदेन इयम् ईशावास्योपनिषत् इति व्यवहारम् आप्नोति। महान्तः आध्यात्मिकाः वास्तविकाः विषयाः अस्यां वर्तन्ते।संहितान्तर्गता उपनिषत् च एषा एका एव। अतः गणनायाम् अस्याः प्राथम्यं सिद्धम्। (वाजसनेय) संहितान्तर्गतत्वात् अस्याः (वाजसनेय) संहितो पनिषत् इति अपरमपि नाम वर्तते। मन्त्ररूपेण वर्तते इति कृत्वा मन्त्रोपनिषत् इति प्रसिद्धिः अस्याः जाता अस्ति।अत्र च अष्टादश मन्त्राः सन्ति।

## १.२.४.ईशावास्योपनिषत्-विषयसङ्ग्रहः

इदं जगत् परिणामशीलम् । भगवान् च सर्वव्यापकः। विद्यमानं वस्तुजातं परमेश्वरेण अनुगृहीतम्। अतः परमेश्वरप्रसादितेन तेन वस्तुजातेन पोषणं कुर्यात्।अन्येन वस्तुजातेन पोषणम् अपहरणं भवति। कर्म आयुःकारकम् इति अवगाहनम्

वेदविहितकर्माणि नित्यकर्माणि, नैमित्तिककर्माणि,काम्यकर्माणि सर्वाण्यपि कर्माणि विश्वासेन शास्त्रपूर्वकं अनुतिष्ठेत्। यश्च शतवर्षजीवनम् इच्छति सः एवम् एव प्रवर्तेत। तस्य अस्मात् अन्यः पन्थाः नास्ति। अतः सङ्गहीनस्सन् कर्माणि कुर्वन् निष्कामकर्माचरणपरो भवेत्। आत्मघातुकानां निन्दनम् आत्मशक्तिः प्रभावपूर्णा। आत्मशक्तिहीनाः केचन भवन्ति। ते आत्मशक्तेः दूरतः स्थित्वा आत्मधातुकाः भवन्ति। एते आत्मधातुकाः काम-क्रोधाभिभूताः भवन्ति।इन्द्रियलोलुपाः भवन्ति। इन्द्रियार्थसुखंम् अनुभवन्ति। शाश्वतं मुक्तिमार्गं नैव चिन्तयन्ति। अत एव एते राक्षसजन्मानः भवन्ति। तमोलोकान् च प्राप्नुवन्ति ।

### आत्मस्वरूपम्

आत्मा चलनरहितः। अयं सर्वव्यापकः,स्वयं पूर्णश्च। तथापि अयं मनसः अपि वेगवान्।इन्द्रियाणां सुतराम् अभिगम्यो न भवति। नाम आत्मा इन्द्रियशक्तेः अतीतः। अयं नित्यः,स्थिरश्च,। स्थिरः अपि अयं धावतः विषयान् अतीत्य तिष्ठति। आत्मा चित्स्वरूपम्। चैतन्यात्मकम् उ प्राणशक्त्यात्मकम् । अनेनैव चैतन्येन उ प्राणशक्त्या , वायुः स्वस्वकार्यकलापं निर्वहति।

अयम् आत्मा सदा चलति ,सदा न प्रचलति च।आत्मा सर्वस्य दूरे तिष्ठति,सर्वस्य समीपे तिष्ठति च। सर्वेषाम् अन्तः वर्तते, सर्वेषाम् बहिश्च वर्तते च। चलन - दूरावस्थान - बहिर्वर्तनादयः सोपाधिकस्य आत्मानः धर्माः। अचलन - समीपावस्थान - अन्तर्वर्तनादयः निरुपाधिकस्य आत्मानः धर्माः।

### आत्मैक्यज्ञानस्य फलम्

आत्मवित् पुरुषः स्वस्मिन् अन्तः अवस्थितम् चित्स्वरूपम् आत्मानम् अवगच्छति।तदेव च चैतन्यात्मकम् चित्स्वरूपम् सर्वभूतेषु अधिगच्छति।स्वस्मिन् -स्वभिन्नेषु च विद्यमानं चैतन्यम् एकम् अनुपश्यति। स्वीयचैतन्ये सर्वाणि भूतानि = सर्वभूतानां चैतन्यम्,भावयति। आत्मवत्

सर्वभूतेषु प्रवर्तते। यः आत्मनि सर्वभूतानि पश्यति सः मानवः अरिषड्वर्गं विजित्य शाश्वतिकीं शान्तिम् अधिगच्छति । तस्य शोकः वा क्रोधः वा न भवति।

**आत्मज्ञानसम्पादने विद्या-अविद्ययोः स्थानम्**

अन्तरार्थं प्रति अवगाहनारहितम् शास्त्रपूर्वकं विज्ञानम् एव विद्या इत्युच्यते। निबद्धताहीनम् अनवगाहना पूर्वकम् कर्माचरणम् एव अविद्या इत्युच्यते। अविद्याम् (अज्ञानम्, यज्ञकर्म) ये उपासते ते गाढम् अन्धकारं प्रविशन्ति। विद्यायाम् (यज्ञतत्त्व विज्ञाने) एव ये रताः ते तु अदर्शनात्मकात् तमसः अपि बहुतरं तमः प्रविशन्ति।विद्यायाः आचरणशून्यं सामान्यसिद्धान्त ज्ञानं फलम्। अविद्यायाः अज्ञानेन कृतं यज्ञकर्म फलम्। एवं विद्याविद्ययोःपृथक् पृथक् फलं भवति इति श्रूयते। यः साधकः पुरुषः विद्याम् अविद्यां च उभयम् समुच्चित्य जानाति सः पुरुषः अविद्यया उ यज्ञकर्मणा अग्निहोत्रादिना मृत्युं तरति। अनन्तरं विद्यया उ देवताज्ञानेन च अमृतम् अश्नुते।

**संभूति - असंभूत्युपासनयोः स्थानम्**

सम्भवनम् = सम्भूतिः,सा(= सम्भूतिः) यस्य कार्यस्य, सा अपि अत्र सम्भूतिः एव भवति ,तस्याः भिन्ना विरुद्धा वा असम्भूतिः, इति असम्भूतिपदस्य व्युत्पत्तिः। प्रकृतिः अथवा माया वा इत्यर्थः। इमाम् असम्भूतिं ये उपासते ते गाढम् अन्धकारं प्रविशन्ति। सम्भूतिः सम्भवात्मकधर्मवान् । ब्रह्मणः प्रथमा सम्भूतिः = अभिव्यक्तिः हिरण्यगर्भः। अत एव हिरण्यगर्भः सम्भूतिशब्देन उच्यते। हिरण्यगर्भस्यैव ब्रह्मा,कार्यब्रह्मा,सूत्रात्मा इति व्यवहारः। एवम् सम्भूत्याम् = ये रताः ते तु अदर्शनात्मकात् तमसः अपि बहुतरं तमः प्रविशन्ति। संभवात् = सम्भूतेः=कार्यब्रह्मोपासनात् अणिमाद्यैश्वर्यलक्षणं फलम् जायते। असंभवात् = असम्भूतेः =अव्याकृतोपासनात् प्रकृतिलयात्मकं फलम् जायते।

यः साधकः सम्भूति- असम्भूतिं च उभयम् समुच्चित्य जानाति सः पुरुषः सम्भूत्या = कार्यब्रह्मोपासना ल्लब्धेन अणिमाद्यैश्वर्यलक्षणेन मृत्युं तरति। अनन्तरं असम्भूत्या = प्रकृतिलयात्मकेन च अमृतम् अश्नुते। अतः सत्कार्यकारी पुण्यपुरुषः अपि अमरत्वसम्पादनाय सम्भूतिम् असम्भूतिं च उभयम् समुच्चित्य जानीयात्।

## आसन्नमरणस्य आदित्यं प्रति प्रार्थनम्

उपासकः मरणसमये 'हे भगवन्! सूर्यदेव! त्वं सत्यात्मा। अहं च सत्यधर्मानुष्ठाता। तव सत्यात्मा च हिरण्मय(कनक)सदृशेन ज्योति र्मयेन (तव) कान्तिपात्रेण आच्छादितः। किञ्च त्वं पूषा ; अस्माकं पोषकः। भवतः किरणजन्यसंयोगक्रिया द्वारा भवान् विश्ववस्तुषु पौष्टिकतां (FI LL) पूरयसि।तानि च अस्मान् पोषयन्ति। तादृशस्त्वं दयया सत्यधर्मानुष्ठातुः मम , तव सत्यात्मनः दर्शनाय आच्छादितं कान्त्यात्मकं ज्योतिरूपं हिरण्मयपात्रम् अपसारय हे भगवन् ! सूर्यदेव! त्वं जगतः पोषकः। निरालम्बे मार्गे एकाकी सन् गच्छसि । अतः त्वां एकर्षं कथयन्ति। सर्वान् संयमयसि इति केचित् यमं त्वां आह्वयन्ति।भवान् स्वयं सरणशीलः। किरणात्मना सरति, जला त्मना सरति, बुद्ध्यात्मना सरति,चैतन्यात्मना सरति,एवं सरतीति सूर्यः सम्पन्नः। प्रजापतेः अपत्यं पुमान् प्राजापत्यस्त्वं प्रजानां संरक्षकः। तादृशस्त्वं ,सूर्यभगवन् !किरणान् उपसंहर। तेजः एकीकुरु। अन्यथा अद्भुतं तव सत्यात्मानं द्रष्टुं न पारयामि। भवतः रूपं कल्याणतमम् अत्यन्तं शोभनम्। तव सत्यात्मानः प्रसादादेव एनम् रूपं द्रष्टुं समर्थः सम्पन्नः। यतः,योऽसौ तव आदित्यमणडलस्थः व्याहृत्यवयवः पुरुषः,सः अहम् एव अतः अहं त्वां भृत्यवत् न याचे इतिसूर्यदेवं प्रार्थयति।

मरिष्यतः मम प्राणः (वायुः) देहं त्यक्त्वा अनन्तं सर्वात्मकम् अनिलं प्रतिपद्यताम्। ज्ञन - कर्मसंस्कृतम् उत्क्रामतु। अथ इदं शरीरम् अग्नौ हुतं सत् भस्मान्तं भूयात्। हे क्रतो! सङ्कल्पात्मक! यत् मम स्मर्तव्यं तस्य कालः अयं प्रत्युपस्थितः। अतः स्मर।अग्ने ! एतावन्तं कालं कृतं स्मर। यन्मया बाल्यप्रभृति अनुष्ठितं कर्म तच्च स्मर इति प्राणप्रयाणसमये उपासकः अग्निदेवं प्रार्थयति, अत्यादरेण स्मरणाय आत्मानम् आदिशति।

आसन्नमरणः उपासकः कर्मसाक्षिणम् अग्निदेवम् एवं प्रार्थयति - अग्ने! जननमरणदायकेन दक्षिणेन मार्गेण अहम् एतावत् निर्विण्णः। अतः कर्फलभोगरूपधनस्य दानाय गमन (मरण)- आगमन(जन्म) वर्जितेन शोभनेन मार्गेण मां गमय।जन्मनः प्रभृति कृतानि सर्वाण्यपि त्वं जानासि।अस्मासु कुटिलं वञ्चनात्मकं पापस्वभावं विनशय।ततः वयं विशुद्धास्सन्तः इष्टं प्राप्स्याम। देव !मरणस्य आसन्नत्वात् तव परिचर्याम् अपि कर्तुं न शक्नुमः। अतः तुभ्यं बहुतरं वाचिकं नमस्कारं समर्पयामि।नमस्कारेण परिचरेयम् इति ।अत्र उपासकः दुःखपूरिते अस्मिन् प्रपञ्चे पुनः अनागमनाय आत्मानं देवयानद्वारा नय इति अग्निं गाढं प्रार्थयति।

### १.२.५.ईशावास्योपनिषत्-वैशिष्ट्यम्

इयम् उपनिषत् ज्ञान-कर्मणोः समन्वयविधानं प्रदर्शयति। नास्तिकबुद्धीनाम् स्थितिं च ज्ञापयति। आत्मस्वरूपम्, आत्मसाक्षात्कारस्थितिं च ख्यापयति। एकत्व-बहुत्व, चलत्व-अचलत्वानां आत्मगुणानां विरोधं परिहरति। विद्या- अविद्ययोः सम्भूत्यसम्भूत्योः स्थानं सूचयति। अन्ततः जीवस्य तपनशीलतां दर्शयति। इत्थम् इयम् उपासकानाम् अभ्युदयकरं मार्गं सन्दिशति।

## १.३.उपसंहारः

एवम् अत्र उपनिषद् शब्दस्य निर्वचनम् ,तत्र प्रतिपाद्यं वस्तु, ईशावास्योपनिषदः विषयसङ्ग्रहश्च उपनिबद्धः। विषयसङ्ग्रहे च आवश्यकाः प्राथमिकाः विषयाः, आत्मतत्त्वं प्रति अवगाहनम्, आत्मज्ञान सम्पादने विद्या-अविद्ययोः स्वरूपम् आत्मज्ञानसम्पादने सम्भूति-असम्भूत्योः स्वरूपम् आसन्नमरणस्य आदित्यं प्रति प्रार्थनम् इत्येवं एते विषयाः प्रस्तुताः।

## १.४.अभ्यासः

- उपनिषद् शब्दस्य निर्वचनं किम् ?
- आत्मनः विरुद्धधर्माश्रयत्वं कथम् - विशदयत?

# UNIT-II
# निराकारोपासकस्य आवश्यकाः प्राथमिकाः विषयाः

**संरचना**

२.०.परिचयः
२.१.लक्ष्याणि
२.२.निराकारोपासकस्य आवश्यकाः प्राथमिकाः विषयाः
२.२.१.भगवतः विश्वव्याप्तत्ववर्णनम्
२.२.२.कर्म आयुःकारकम् इति अवगाहनम्
२.३.उपसंहारः
२.४.अभ्यासः

## २.०.परिचयः

'निराकारोपासकस्य ज्ञातव्याः आवश्यकाः प्राथमिकाः विषयाः' इत्ययं पाठ्यांशः ईशावास्योपनिषदि वर्तते। प्रथमं मन्त्रद्वयं इमम् अंशं बोधयतः।बुद्धिः द्विविधा भवति। आस्तिकता बुद्धिः,नास्तिकताबुद्धिश्चेति। विश्वं प्रति, प्रकृतिं प्रति च, आस्तिकताबुद्धिविभवस्य आलोचनाविधानम् अत्र अभिवर्णितम्।

## २.१.लक्ष्याणि

'जन्तूनां नरजन्म दुर्लभम्' इति काचित् उक्तिः। सा च उक्तिः मानवः साधनमार्गैः यदा पुरुषार्थपरः भवति, तदैव सत्यं भवति। परं यदा मानवः दानवः भवति , तदा तु तस्य विषये इयम् उक्तिः अनर्थकमेव। तस्य वचनस्य सत्यता वा असत्यता वा तथा भवतु, परं 'उद्धरेत् आत्मना आत्मानम्' इति गीताचार्यस्य वचनं मनसि निधाय, मानवः आत्मोद्धरणोद्योगी भवेत्। एतस्य आत्मोद्धरणोद्योगस्यैव वेदान्ते उपासनम् इति व्यवहारः विद्यते। उपासनशीलः उपासकः भवति। उपासनपरः यदा आत्मोद्धरणशीलः सन् आत्मज्ञानाय यतते, तदा केचन तेन बौद्धिकाः प्रथमिकाः विषयाः ज्ञेयाः भवन्ति। तैः प्रथमिकैः विषयैः , आत्मज्ञानाय यतमानस्य बुद्धिव्यवस्था, आलोचनविधानं च (ग्क्ष्ग्रुक्क्च्क्र), तेन क्रियमाणस्य व्यवसायस्य, अनुकूलं भवति। एतत्

**पाठ्यांशस्य अध्ययनेन-**

- निराकारोपासकस्य आलोचनाविधानम् अत्र पठितुं प्रभवति।
- साकारोपासकस्य आचरणात्मकविधानम् अत्र लिखितुं प्रभवति।

## २.२. निराकारोपासकस्य आवश्यकाः प्राथमिकाः विषयाः

२.२.१. भगवतः विश्वव्याप्तत्ववर्णनम्

**ॐ ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्**
**तेन त्यक्तेन भुञ्जीथा मागृधः कस्यस्विद् धनम् ।। १ ।। इति**

मन्त्रपरिचयः वेदाः ऋक्-यजुष्-साम-अधर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति। तत्र वेदानाम् अन्तः भागः उपनिषद् भवति।चतुर्णां वेदानाम् प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्,(वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिमाध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

मन्त्रसन्दर्भः भगवदुपासकाः सगुणोपासकाः , निर्गुणोपासकाश्च।तेषाम् एव क्रमेण साकारोपासकाः ,निराकारोपासकाश्च इति व्यवहारः अस्ति। साधनमार्गम् अवलम्ब्य अपि कर्म-ज्ञान-भक्ति-राजयोगमार्गानुयायिनः इति पुनः उपासकाः चतुर्धा भवन्ति। तत्र ज्ञानमार्गानुयायिनः साधकस्य, निराकारोपासनरूपं साधनविधानं निरूपयन् अयं भागः, ईशावास्योपनिषदि प्रथमः मन्त्रः।

**मन्त्रपदविभागः** - ॐ ईशावास्यम्, इदम्, सर्वम्, यत् किञ्चित्, जगत्याम्, जगत् ।।
तेन, त्यक्तेन, भुञ्जीथाः, मा गृधः, कस्य स्विद् धनम् ।।

**मन्त्रस्य अन्वयक्रमः** -जगत्याम्, यत्किञ्च, जगत्, इदं सर्वम् ईशावास्यम्, तेन त्यक्तेन भुञ्जीथाः, कस्य स्विद् धनम् मा गृधः। मन्त्रस्य प्रतिपदार्थः - जगत्याम् = अस्मिन् प्रपञ्चे; यत् किञ्च = यत् किञ्चत्सर्वम् दृश्यमानम्; जगत् = परिणामशीलम् परिवर्तनशीलं च; इदं सर्वम् = परिणामात्मकं परिवर्तनात्मकं वा इदं समस्तं प्रपञ्चम्; ईशा = परमेश्वरेण प्रत्यगात्मतया; वास्यम् = आवृतम्, व्याप्तम्, निविष्टम्; तेन त्यक्तेन = विश्वव्यापकस्य परमेश्वरस्य अनुगृहीतेन त्यागेन; भुञ्जीथाः =आत्मानं पालयेथाः; कस्य स्विद् = (परमेश्वरानुगृहीतात्) इतरस्य; धनम् = द्रव्यम्; मा गृधः = मा कांक्षीः;

**मन्त्रभावः-** जगत् शब्दः गम् धातोः निष्पन्नः। गम् धातुश्च गत्यर्थकः। पुनः पुनः गतिशीलकम् इत्यर्थः । अनुक्षणं परिणामशीलम् इति भावः। अस्मिन् जगति विद्यमानं सर्वम् अनुक्षणं परिणामशीलं, परिवर्तनशीलं च। भगवान् च सर्वव्यापकः। तथाहि - परमेश्वरः पञ्चभूतात्मकः, प्रकृतिस्वरूपः,परिवर्तनि संसारे सर्वत्र, सर्वस्मिन् च प्रयोजनरूपेण व्याप्य स्थितः। नाम जगति यत् यत् वस्तु जातम् अस्ति, प्राणिनाम् अवसरपूरणाय तस्मिन् वस्तुनि प्रयोजनरूपेण व्याप्य परमेश्वरः स्थितः इत्यर्थः समायाति। अतः परिवर्तनि संसारे, विद्यमानं वस्तुजातं यावत् प्राणि-नाम् अवसरपूरणाय परमेश्वरेण त्यक्तम्उ दत्तम्, प्रसादितम् ,अनुगृहीतम्। अतः परमेश्वरप्रसादितेन तेन वस्तु- जातेन पोषणं कुर्यात्। तत्रापि परमेश्वरः एकैकस्य प्रत्येकतः अवसरपूर्त्यै एकैकं वस्तु प्रत्येकतया प्रसादितवान्। प्रत्येकतया प्रसादितेन तेनैव वस्तुजातेन सः सः पोषणं कुर्यात्। प्रसादितात् अन्येन वस्तुजातेन पोषणं नैव कुर्यात्, प्रसादितात् अन्येन वस्तुजातेन पोषणम् अपहरणं भवति। एवम् अयं मन्त्रभागः निराकारोपासनं सूचयति विशेषांशः।

**स्वावलोकनप्रश्नाः**

१.'तेन त्यक्तेन भुञ्जीथाः' अत्र 'त्यक्तेन' इत्यस्य अर्थः कः ?

२. अस्मिन् मन्त्रे 'जगत्' पदं किम् अर्थं बोधयति ?

२.२.२.कर्म आयुःकारकम् इति अवगाहनम्

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।।२।।**

मन्त्रपरिचयः वेदाः ऋक्-यजुष्-साम-अथर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति।तत्र वेदानाम् अन्तः भागः उपनिषद् भवति। चतुर्णां वेदानां प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्यो-पनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्, (वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिमाध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

मन्त्रसन्दर्भः विश्वासेन शास्त्रपूर्वकं वेदविहितकर्मसु प्रवर्तते , दुष्कर्मकालुष्यं अपनयति इत्यंशद्वयं बोधयति ईशावास्योपनिषदि द्वितीयः अयं भागः मन्त्रः।

**मन्त्रपदविभागः** -कुर्वन्, एव, इह, कर्माणि, जिजीविषेत्, शतम्, समाः।
एवम्, त्वयि, न, अन्यथा, इतः, अस्ति, न, कर्म, लिप्यते, नरे, ।।

**मन्त्रस्य अन्वयः -** इह,कर्माणि,कुर्वन्,एव,शतं समाः,जिजीविषेत्,एवं त्वयि नरे इतः अन्यथा न अस्ति,कर्म न लिप्यत मन्त्रस्य प्रतिपदार्थः इह = अस्मिन् प्रपञ्चे; कर्माणि = शास्त्रविहितानि अग्निहोत्रादीनि;कुर्वन् = आचरन्; एव = केवलम्; शतम् = शतसंख्याकान्; समाः = संवत्सरान्; जिजीविषेत् = जीवितुम् इच्छेत्; एवं = एवं प्रकारेण; त्वयि = जिजीविषति; नरे = मानवमात्रे; इतः = अस्मात् मार्गात् (अग्निहोत्रादीनि कर्माणि कुर्वतः वर्तमानात् प्रकारात्); अन्यथा = प्रकारान्तरम्; न अस्ति = न विद्यते; येन = येन प्रकारेण; कर्म = अशुभम्; न लिप्यत = न स्पृश्यते;

**मन्त्रभावः-** वेदविहितकर्माणि नित्यकर्माणि,नैमित्तिककर्माणि,काम्यकर्माणि इति प्रधानतः त्रिविधानि। तत्र सन्ध्यावन्दन- अग्निकार्यादीनि नित्यकर्माणि। जाताशौच-मृताशौचादीनि नैमित्तिकानि कर्माणि। यज्ञयागादीनि काम्यकर्माणि। एतानि सर्वाण्यपि कर्माणि विश्वासेन शास्त्रपूर्वकं अनुतिष्ठेत्। यश्च शतवर्षजीवनम् इच्छति सः एवम् एव प्रवर्तेत। तस्य अस्मात् अन्यः पन्थाः नास्ति। यः विश्वासेन शास्त्रपूर्वकं वेदविहितकर्माणि अनुतिष्ठति तस्य कर्मसु सङ्गः नैव भवति। निष्काम-कर्माचरण शीलताम् अभ्यस्यति। तेन च दुष्कर्मकालुष्यं न लिप्यते। अतः सङ्गहीनस्सन् कर्माणि कुर्वन् निष्काम- कर्माचरणपरः भवतु इति च भावः।

**स्वावलोकनप्रश्नाः**

१.किं कुर्वन् शतं वत्सराणि जीवितुम् इच्छेत् ?

२. अस्मिन् मन्त्रे 'समाः' पदं किम् अर्थं बोधयति ?

## २.३.उपसंहारः

एवं प्रधानतया उपासनं जानाति। उपासनगतं द्वैविध्यम् अवगच्छति। तयोः आलोचनविधानम्, आचरणात्मक- विधानं च जानाति।निराकारोपासकः भगवतो वा ब्रह्मणो वा जगद्व्याप्तत्वम् अवगच्छति। साकारोपासकः तु कर्मकुर्वन्नेव, जनन-मरणचक्रतः मुक्तिम् अप्राप्य, ब्रह्मणः जगद्व्याप्तत्वबुद्धेः दूरतः प्रवर्तते इति च जानाति।

## २.४.अभ्यासः

मन्त्रद्वयस्य व्याख्यानं कुरुत ?

अ) ॐ ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्
तेन त्यक्तेन भुञ्जीथा मागृधः कस्यस्विद् धनम् ।।

इ) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।

# UNIT-III
# आत्मतत्त्वं प्रति अवगाहनम्

**संरचना**

३.०.परिचयः
३.१.लक्ष्याणि
३.२.आत्मतत्त्वं प्रति अवगाहनम्
    ३.२.१.आत्मघातुकानां निन्दनम्
    ३.२.२.आत्मस्वरूपम्-१
    ३.२.३.आत्मस्वरूपम्-२
    ३.२.४.आत्मैक्यज्ञानस्य फलम्
    ३.२.५.आत्मैक्यज्ञानस्य फलम्
    ३.२.६.आत्मनोः स्वरूपस्य ज्ञापनम्
३.३.उपसंहारः
३.४.अभ्यासः

## ३.०.परिचयः

आत्मतत्त्वं प्रति अवगाहनम् इत्ययं पाठ्यांशः ईशावास्योपनिषदि तृतीयमन्त्रतः आरभ्य अष्टममन्त्रपर्यन्तं ,आहत्य षट् मन्त्रेषु प्रवर्तते। अत्र च प्रधानतया ,आत्मघातुकानां निन्दनम्, भिन्नकोणेषु आत्मनः स्वरूपम्, आत्मैक्यज्ञानस्य विस्तृतं फलम् , अन्ततः आत्मनः स्वरूपस्य ज्ञापनम् इत्येते विषयाः अत्र उपवर्णिताः। एते च विषयाः स्थूलतः आत्मज्ञानं प्रति अवगाहनां कल्पयन्ति।

## ३.१.लक्ष्याणि

मानवः अवश्यं स्वयमेव आत्मनः उद्धरणाय प्रयतेत। तदर्थं च सः आत्मज्ञानसम्पन्नः भवेत्। आत्मज्ञानसम्पन्नश्च आत्मवान् भवति। सः पुरुषः आत्मबलसम्पन्नश्च भवति। आत्मविश्वासपूर्णो भवति। आत्मानं गौरवास्पदं करोति। आत्मानः समुन्नतिं साधयति। एवम् आत्मवान् आत्मानम् उद्धरति। यः आत्मवान् न भवति , सः आत्मज्ञानशून्यः आत्मवत्सर्वभूतानि

इति ज्ञानं न लभते। अयं निजः अयं परः इति भावनातः मुक्तः न भवति । आत्मानः उन्नतिं नैव चिन्तयति। स्वार्थपरायणो भवति। परैः निन्द्यो भवति। एवम् आत्मघातुकः भवति । अतः आत्मतत्त्वावगाहनाय अयं भागः प्रवृत्तः। एतत् पाठ्यांशस्य अध्ययनेन-

- आत्मघातुकानां मानसिकम् अन्तरं प्रति पठितुं पारयति।
- विस्तृतम् आत्मनः स्वरूपं लिखितुं प्रभवति।
- सर्वत्र स्थितः आत्मा एक एव इति वक्तुं समर्थो भवति।
- आचरणात्मकम् आत्मनः ज्ञानस्य फलं अत्र ज्ञातुं प्रभवति।

## ३.२.आत्मतत्त्वं प्रति अवगाहनम्

३.२.१.आत्मघातुकानां निन्दनम्

**असुर्या नाम ते लोका अन्धेन तमसावृताः**
**तान् ते प्रत्याभिगच्छन्ति ये के चात्महानो जनाः ।।३।।**

**मन्त्रपरिचयः-** वेदाः ऋक्-यजुष्-साम-अधर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति। तत्र वेदानाम् अन्तः भागः उपनिषद् भवति।चतुर्णां वेदानां प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्, (वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंह्तिायाः अन्तिमाध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः-** सर्वः अपि आत्मवान् (SELF- POSSESSED) स्यात्। आत्मवान् पुरुषः आत्मशक्तिसम्पन्नः आत्मबल सम्पन्नश्च भवति। आत्मानः समुन्नतिं साधयति। एवम् आत्मवान् आत्मानम् उद्धरति। यः आत्मवान् न भवति, सः आत्मज्ञानशून्यो भूत्वा आत्मघातुकः भवति। तस्य जीवनम् अन्धकारबन्धुरम् एव इत्येतत् निरूपयन् अयं भागः ईशावाश्योपनिषदि तृतीयः मन्त्रः।

**मन्त्रपदविभागः** - असुर्याः, नाम, ते, लोकाः, अन्धेन, तमसा, आवृताः।
तान्, ते, प्रेत्य अभिगच्छन्ति, ये के, च, आत्महनः, जनाः ।।

**मन्त्रस्य अन्वयः** -असुर्याः अन्धेन तमसा आवृताः,नाम ते लोकाः ये के च जनाः आत्महनः ते, प्रेत्य,तान्,अभिगच्छन्ति।

**मन्त्रस्य प्रतिपदर्थः-** असुर्याःउ असुराणां सम्बन्धीनि; अन्धेन= अदर्शनात्मकेन गाढेन; तमसा = अन्धकारेण; आवृताः= आच्छादितानि;नाम= नूनम्; ते= तद्विधानि; लोकाः= (कर्मफलभूतानि)जन्मानि; ये के = ये केचित्; च= अपि; जनाः= विद्वत्-जनाः; आत्महनः= आत्मघातुकाः; ते = आत्मघातुकाः अविद्वज्जनाः; प्रेत्य = मरणानन्तरम्; तान् = कर्मणः फलभूतात्मकान् लोकान् (जन्मानि); अभिगच्छन्ति = प्राप्नुवन्ति;

**मन्त्रभावः-** प्राणिषु मानवः अत्युत्तमः। तस्य सौकर्यकारि शरीरम्, विवेचनात्मिका बुद्धिः, सुखाद्युपलब्धिसाधनं मनश्च विद्यते। इयं च मानवस्य अभ्युदयकारिणी साधनसम्पत्तिः। साधन-सम्पत्तेः शक्तयश्च अमोघाः विद्यन्ते। शारीरकशक्तिः, बौद्धिक- शक्तिः,मानसिकशक्तिः, आत्मशक्तिश्चेति। तासु च आत्मशक्तिः प्रभावपूर्णा। इयं मानवानाम् आत्मोद्धरणाय आत्मसाक्षा-त्काराय च कल्पते। आत्मशक्तिः प्राथमिकदशायां मानवं आत्मबलसम्पन्नं करोति। आत्मनि विश्वासं पूरयति।मानवं क्रिया- शीलं प्रयत्नशीलं च करोति। मानवस्य विवेचनां वर्धयति। औन्नत्यं सम्पादयति। सर्वम् आत्मीयम् भावयति। आत्मीयता च प्रेमभावनां विस्तारयति। सर्वदा आत्मनः उद्धरणाय प्रयतते। कदापि आत्मानं न न्यूनीकरोति।आत्मशक्तिहीनाः केचन भवन्ति। तेषाम् आत्मज्ञानं न भवति। आत्मनः शक्तेः औन्नत्यं नैव जानन्ति। सदा आत्मानं न्यूनीकुर्वन्ति। आत्मनः उद्धरणं प्रति उद्यमनम् एव ते न जानन्ति। आत्मनः साक्षात्कारं प्रति अवगाहनाहीनाः भवन्ति। अरिषड्वर्गाणां वशाः भवन्ति। एवम् आत्मशक्तेः दूरतः स्थित्वा आत्मघातुकाः भवन्ति। एते आत्मघतुकाः काम-क्रोधाभिभूताः भवन्ति। इन्द्रिय- लोलुपाः भवन्ति। इन्द्रियार्थसुखम् अनुभवन्ति। शाश्वतं मुक्तिमार्गं नैव चिन्तयन्ति। अत एव एते राक्षसजन्मानः भवन्ति। एवं आत्मज्ञानहीनाः सन्तः, आत्मघतुकाः भूत्वा, राक्षसेषु जन्म प्राप्नुवन्ति। ते मरणानन्तरं पुनः राक्षसगुणान् प्राप्य, तमो- लोकान् एव प्राप्नुवन्ति इति भावः। अतः मानवः प्रयत्नेन साधनशीलो भवेत्। आत्मज्ञानसम्पन्नः स्यात्। आत्मवान् भवेत्। आत्मानम् उद्धरेत्। आत्मनः साक्षात्कारं च प्राप्नुयात्। दिव्यलोकान् च साधयेत्। क्रमेण मुक्तिमार्गं च प्रविशेत्।

**स्वावलोकनप्रश्नाः**

१.आत्महनः कुत्र अभिगच्छन्ति ?

२. असुर्याः लोकाः कीदृशाः ?

**३.२.२.आत्मस्वरूपम्-१**

**अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत्।**
**तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ।।४।।**

**मन्त्रपरिचयः :-** वेदाः ऋक्-यजुष्-साम-अधर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति। तत्र वेदानाम् अन्तः भागः उपनिषद् भवति। चतुर्णां वेदानाम् प्रत्येकशः उपनिषदः भवन्ति। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। उपनिषदश्च दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। अस्याः एव मन्त्रोपनिषत्,(वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिमाध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः :-** आत्मानं प्रति अवगाहनाशून्यः विवेकहीनः भवति। तथा हि-आत्मज्ञानहीनता (LACK OF SELF -AWARENESS) इह लोके श्रेयोमार्गात् आत्मनं पातयति। आत्मपतनं च विषयेषु सङ्गं जनयति। सङ्गश्च मानवं कामपूर्णं, ततः क्रोधाविष्टं च करोति। क्रोधावेशः जनं मोहितं करोति। मोहश्च स्मृतिविभ्रमं जनयति। स्मृतेः विभ्रमेण बुद्धिनाशः, तेन च भ्रष्टश्च भवति। मरणानन्तरं परलोके असूर्यलोकं प्रविश्य, अन्धे तमसि, जीवन् अधो लोकान् गच्छति। अतः सर्वः अपि आत्मज्ञानं सम्पादयेत्। आत्मस्वरूपं च जानीयात् इत्येतत् अंशं निरूपयन् अयं भागः ईशावास्योपनिषदि चतुर्थः मन्त्रः।

**मन्त्रपदविभागः -** अनेजत्, एकम्, मनसः जवीयः, न, एनत्, देवाः, आप्नुवन्, पूर्वम्, अमर्षत्। तत्, धावतः, अन्यान्, अत्येति, तिष्ठत्, तस्मिन्,अपः, दधाति।।

**मन्त्रस्य अन्वयः** - तत्, एकम्, अनेजत्, मनसः, जवीयः, देवाः,एनत्, न, आप्नुवन्। पूर्वम् अर्षत् तत् तिष्ठत् धावतः अन्यान्, अत्येति, तस्मिन्, मातरिश्वा, अपः, दधाति।

**मन्त्रस्य प्रतिपदार्थः :-** ततः = सः आत्मा; एकम् = अद्वितीयम्; अनेजत् = चलनरहितम् (परिणामरहितम्); मनसः = चेतसः; जवीयः = वेगवत्तरः; देवाः = इन्द्रियाणि; एनत् = आत्मानम्; न आप्नुवन् = आप्तुम् शक्ताः न अभवन्; (यतः = यस्मात् हेतोः) पूर्वम् = अग्रे; अर्षत् = सरः; तत् = सः आत्मा; तिष्ठत् = स्वयम् अविक्रियमेव सत्; धावतः = द्रुतं गच्छतः; अन्यान् = आत्मनः विलक्षणान् मनो-वाक्-इन्द्रिय-प्रभृतीन्; अत्येति = अतीत्य गच्छति; तस्मिन् = नित्यचैतन्यस्वभावे आत्मतत्वे सति (एव); मातरिश्वा = (प्राण)वायुः; अपः = प्राणिनां चेष्टालक्षणानि कर्माणि; दधाति = वहति;

**मन्त्रभावः :-** ईशावास्योपनिषदि चतुर्थः अयं मन्त्रभागः आत्मस्वरूपम् एवं ज्ञापयति। आत्मा चलनरहितः। अयं सर्वव्यापकः, स्वयं पूर्णश्च। अतः चलितुं न प्रभवति। पर्यवसानतः आत्मा अचलः भवति। किञ्च जगत् सर्वं गति शीलकम्,परिणामभूयिष्ठं च। आत्मा तु न गतिशीली, परिणामशाली च। अतः अपि आत्मा चलनरहितः एव भवति। तथापि अयं मनसः अपि वेगवान्।मनः यत्र यत्र गच्छति,आत्मा स्वीयसर्वव्याप्ततागुणेन,ज्योतिरूपेण च तत्र तत्र पूर्वमेव अवतिष्ठते इति कृत्वा अयम् आत्मा मनसः अपि जवीयः। मनः इन्द्रियेभ्यः अपि सूक्ष्मतमम्। अतः मनसः अपि जवीयः अयम् आत्मा,इन्द्रि- याणां सुतराम् अनभिगम्यो भवति। नाम आत्मा इन्द्रियशक्तेः अतीतः। अतः आत्मा कदापि इन्द्रियग्राह्यविषयः न भवति। इन्द्रियाणाम् आत्मानं प्रति वा,आत्मज्ञानं प्रति वा अवगाहनं नैव भवति। अयं नित्यः,कालत्रयवर्ती पदार्थः। स्थिरश्च, सर्व- व्यापकत्वात् चलनाय अवकाशो न विद्यते। स्थिरः अपि अयं धावतः विषयान् अतीत्य तिष्ठति। 'प्राणो मातरिश्वा' 'अयं वै वायुर्मातरिश्वा' इति ऐतरेयं कथयति। मातरिश्वा नाम प्राणः। प्राणः एव अङ्गानि निर्वहति (EXECUTE) करोति। आत्मा चित्स्वरूपम्। चैतन्यात्मकम् उ प्राणशक्त्यात्मकम् इत्यर्थः। अनेनैव चैतन्येन = प्राणशक्त्या,वायुः स्वस्वकार्यकलापं निर्वहति। एवम् आत्मा जीविनां प्राणधारणात्मकं कार्यभारं वहति इत्येवम् आत्मनः स्वरूपम् अत्र किञ्चित् अभिवर्णितम्।

**स्वावलोकनप्रश्नाः**

१.'अनेजत् एकम्'इत्यस्य अभिप्रायः कः ?

२. 'तत् धावतः अन्यान् अत्येति' कथम् ?

### ३.२.३. आत्मस्वरूपम्-२

**तदेजति तन्नैजति तद्दूरे तद्वन्तिके**
**तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।।५।।**

**मन्त्रपरिचयः** :- वेदाः ऋक्-यजुष्-साम-अथर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति। तत्र वेदानाम् अन्तः भागः उपनिषद्

भवति।चतुर्णां वेदानां प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा, इयं शुक्ल- यजुर्वेदस्य सम्बन्धनी उपनिषद्।अस्याः एव मन्त्रोपनिषत्, (वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्ल- यजुर्वेदसंहितायाः अन्तिमाध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः :-** आत्मा परस्परविरुद्धानां धर्माणाम् आश्रयः भवति। आत्मस्वरूपविज्ञानाय उपकारकाः के च ते परस्परं विरुद्धाश्च धर्माः इत्येतदंशं निरूपयन् अयं भागः ईशावास्योपनिषदि पञ्चमः मन्त्रः।

**मन्त्रपदविभागः** - तत्, एजति, तत्,न, एजति, तत्, दूरे,तत् ,उ, अन्तिके। तत्, अन्तः, अस्य, सर्वस्य. तत्, उ, सर्वस्य, अस्य, बाह्यतः।

**मन्त्रस्य अन्वयः** :- तत्, एजति, तत्,न, एजति,तत्, दूरे, तत् उ अन्तिके, तत्, अस्य सर्वस्य, अन्तः, तत्, उ, सर्वस्य अस्य बाह्यतः।

**मन्त्रस्य प्रतिपदार्थः :-** ततः = सः आत्मा; एजति = चलति; तत् = सः आत्मा; न एजति = नैव चलति; तत् = सः आत्मा; दूरे = अविदुषाम् अप्राप्यत्वात् दूरे (इव भवति); तत् = सः आत्मा; उ = अत्यन्तम्; अन्तिके = समीपे (अपि भवति); तत् = सः आत्मा; अस्य सर्वस्य = दृश्यमानस्य अस्य जगतः सर्वस्य; अन्तः = अन्तः(कुक्षौ) विद्यते; तत् = सः आत्मा; उ = अत्यन्तम्; सर्वस्य अस्य = दृश्यमानस्य अस्य जगतः सर्वस्य; बाह्यतः = बहिः विद्यते;

**मन्त्रभावः :-** ईशावास्योपनिषदि पञ्चमः अयं मन्त्रभागः आत्मगतानां परस्परविरुद्धानां धर्माणाम् विवरणद्वारा आत्मस्वरूप- अवगमनाय प्रयत्नं करोति। तथाहि-अयम् आत्मा सदा चलति, सदा न प्रचलति च। आत्मा सर्वस्य दूरे तिष्ठति, सर्वस्य समीपे तिष्ठति च। सर्वेषाम् अन्तः वर्तते, सर्वेषाम् बहिश्च वर्तते च।(१) चलनम्-अचलनम् (२)दूरे-समीपयोः अवस्थानम्, (३) अन्तः-बहिश्च वर्तनम् इत्येवम् अयम् आत्मा परस्परविरुद्धान् षट् धर्मान् धरति। तस्य अयम् आशयः - आत्मा द्विविधः। जीवात्मा परमात्मा चेति। सोपाधिकः आत्मा जीवात्मा, प्रत्येकं देहम् आश्रित्य तिष्ठति। निरुपाधिकः आत्मा परमात्मा सर्वव्यापकः, स एव नित्यः, स्थिरश्च भवति। यदा अयं वस्तुनिष्ठस्सन् सोपाधिकः भवति, तदा वस्तुनिष्ठं चलनधर्मम् = गतिशीलकताधर्मं प्राप्नोति। तमेव गतिशीलकताधर्मम् आत्मनि = जीवात्मनि आरोप्य आत्मनः

चलनधर्माश्रयत्वव्यवहारः। यदा अयं उपाधिरहितस्सन् वर्तते तदा अयं सर्वत्र सम्पूर्णम् आवृत्य सर्वव्यापकः तिष्ठति। तदा चलनायैव न पारयति। सर्वव्यापकत्वेन,चलनराहित्यं पुरस्कृत्य, निरुपाधिकस्य आत्मनः अचलनधर्माश्रयत्वव्यवहारः। नाम स्वीयनिजकेवलस्थितौ आत्मा विकाररहितस्सन् अचलो भवति। अनवगाहिनाम् विषयासक्तानाम् अविदुषाम् अप्राप्य- त्वात् (आत्माज्ञानं) आत्मा बहुदूरे इव वर्तते। सर्वत्र आत्मदर्शनं कुर्वतः प्रज्ञावतः आत्मा प्रत्यक्षतः पार्श्वे अत्यन्तम् अन्तिके एव वर्तते। एवमेव आत्मसाक्षात्कारं प्राप्तः सर्वभूतेषु अन्तः अवस्थितं आत्मानम् अनुपश्यति। तथैव जीव-उपाधि- कतया पृथक् पृथक्तया, देहम् आश्रितम्, बहिः अवस्थितम्, आत्मानं च अनुपश्यति।एवं चलन-दूरावस्थान-बहिर्वर्तन-आदयः सोपाधिकस्य आत्मानः = जीवात्मनः धर्माः। अचलन-समीपावस्थान-अन्तर्वर्तनादयः निरुपाधिकस्य आत्मानः = परमात्मनः धर्माः। एवम् उपाधिभेदम् आश्रित्य आत्मनः परस्परविरुद्धधर्माश्रयत्वम् अभिवर्णितम्।

**स्वावलोकनप्रश्नाः**

१.'तत् एजति - तत् न एजति' कदा एजति ? कदा न एजति ?

२. ' सर्वस्य अस्य बाह्यतः' वर्तते - कथम् ?

### ३.२.४.आत्मैक्यज्ञानस्य फलम्

**यस्तु सर्वाणि भूतान्यात्मन्येवानु पश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।६।**

**मन्त्रपरिचयः** :- वेदाः ॠक्-यजुष्-साम-अधर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति। तत्र वेदानाम् अन्तः भागः उपनिषद् भवति। चतुर्णां वेदानाम् प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्, (वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिमाध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः :-**आत्मगुणसम्पन्नः, सर्वभूतेषु अन्तः एकरूपेण अवस्थितं चैतन्यम् अवगच्छति। सर्वम् आत्मनः अभिन्नम् अधिगच्छति। सर्वत्र भूतेषु आत्मवत् प्रवर्तते। लौकिके च जगति प्रेमगुणसम्पन्नः भवति। ममतां त्यजति। समताम् अभ्य- स्यति। द्वेषं दूरीकरोति। श्रेयः साधयति इत्येतदंशं निरूपयन् अयं भागः ईशावास्योपनिषदि षष्ठः मन्त्रः।

**मन्त्रपदविभागः** - यः, तु, सर्वाणि, भूतानि, आत्मनि, एव, अनुपश्यति। सर्वभूतेषु, च, आत्मानं, ततः, न, विजुगुप्सते।।

**मन्त्रस्य अन्वयः** :-यः,तु,सर्वाणि,भूतानि,आत्मनि एव अनुपश्यति, च, सर्वभूतेषु, आत्मानं, (अनुपश्यति) ततः,न,विजुगुप्सते।

**मन्त्रस्य प्रतिपदार्थः :-** यः= मुमुक्षुः यः प्राज्ञः; तु= मात्रम्; सर्वाणि= सकलानि; भूतानि= अव्यक्तादीनि स्थावरान्तानि; आत्मनि = स्वस्मिन्; एव = केवलम्; अनुपश्यति = अवलोकते; च = अपि च; सर्वभूतेषु = अव्यक्तादिस्थावरान्तेषु प्राणिषु सर्वेषु; आत्मानम् = स्वम् आत्मानम्; (अनुपश्यति = अवलोकते); ततः = सर्वभूतेषु आत्मनः,आत्मनि सर्वभूतानां च निर्विशेषदर्शनात्; न विजुगुप्सते = आत्मभिन्नं प्रति घृणां न करोति;

**मन्त्रभावः :-** ईशावास्योपनिषदि षष्ठः अयं मन्त्रभागः आत्मगुणसम्पन्नस्य व्यक्तित्वनिरूपणद्वरा आत्मस्वरूपज्ञापनाय प्रयत्नं करोति। तथा हि- आत्मवित् पुरुषः स्वस्मिन् अन्तः अवस्थितम् देहातिरिक्तम् इन्द्रियातिरिक्तम्, मनसः अतिरिक्तम्, प्राणातिरिक्तं च चित्स्वरूपम् आत्मानम् अवगच्छति।तदेव च चैतन्यात्मकम् चित्स्वरूपम् सर्वभूतेषु अधिगच्छति। स्वस्मिन् -स्वभिन्नेषु च विद्यमानं चैतन्यम् एकम् अनुपश्यति।स्वीयचैतन्ये सर्वाणि भूतानि = सर्वभूतानां चैतन्यम्, भावयति। आत्मवत् सर्वभूतेषु प्रवर्तते।सर्वभूतेषु = सर्वभूतानां चैतन्ये आत्मनः चैतन्यम्, भावयति। स्वभिन्नानां सर्वभूतानां कष्टं सुखं च आत्मीयं पश्यति। एवम् सर्वभूतेषु अपरिच्छिन्नस्य चैतन्यस्य साक्षात्कारः जायते। चैतन्यस्य अनेन साक्षात्कारेण इह लोके समाजे सर्वभूतेषु समभावना जायते। समभावना च भूतेषु सानुभूतिं दयां च जनयति। सानुभूतिः दया च मानवं प्रेमास्पदं करोति। तदेव च समरससामाजिकजीवनाय उपकुरुते।तस्मिन्नेव समये समभावनाप्रयुक्ता सानुभूतिः दया च द्वेषं दहति। द्वेषः स्वार्थबुद्धि कारणतः भवति। स्वार्थबुद्धिश्च पृथक्त्वबुद्धिं जनयति। अतः सर्वभूतेषु समभावना, पृथक्त्वबुद्धिं विदार्य, द्वेषस्य अवकाशमेव न ददाति।

**स्वावलोकनप्रश्नाः**

१.आत्मवान् किमर्थं न विजुगुप्सते ?

२. 'सर्वाणि भूतानि आत्मनि एव अनुपश्यति - कथम् ?

### ३.२.५.आत्मैक्यज्ञानस्य फलम्

**यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः।।७।।**

**मन्त्रपरिचयः :-** वेदाः ऋक्-यजुष्-साम-अधर्वणाख्याः चत्वारः तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति।तत्र वेदानाम् अन्तः भागः उपनिषद् भवति। चतुर्णां वेदानां प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्,(वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिम-अध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः :-** आत्मज्ञानसम्पन्नस्य, आत्मसाक्षात्कारं प्राप्नुवतः वा, लौकिके च जगति शोकमोहौ न भवतः। सदा तृप्तिं भजते। सर्वत्र आत्मनः श्रेयः साधयति इत्येतदंशं निरूपयत् अयं भागः ईशावास्योपनिषदि सप्तमः मन्त्रः।

**मन्त्रपदविभागः-** यस्मिन्, सर्वाणि ,भूतानि ,आत्मा, एव, अभूत्, विजानतः। तत्र ,कः, मोहः, कः, शोकः, एकत्वम्, अनुपश्यतः।।

**मन्त्रस्य अन्वयः** :- यस्मिन्,सर्वाणि,भूतानि,आत्मा,एव,अभूत् एकत्वम्, अनुपश्यतः, विजानतः, तत्र, कः, मोहः, कः, शोकः,

**मन्त्रस्य प्रतिपदार्थः-** यस्मिन् = यस्मिन् काले (यादृशे आत्मनि वा); सर्वाणि = समस्तानि; भूतानि = अव्यक्तादिस्थावरान्तानि; आत्मा एव = निर्विशेषदर्शनात् आत्मैव; अभूत् = संवृत्तः; विजानतः = एवं परमार्थवस्तु तत्त्वं विशिष्य ज्ञातवतः; एकत्वम् = ऐक्यम्; अनुपश्यतः =

अवलोकयतः; तत्र = तस्मिन् काले (तादृशे आत्मनि वा)कःउकीदृशः;मोहः = सम्भ्रमः; कः= कीदृशः; शोकः = खेदः; मन्त्रभावः ईशावास्योपनिषदि सप्तमः अयं मन्त्रभागः आत्मज्ञानवैभवेण मानवः अरिषड्वर्गं विजित्य शाश्वतिकीं शान्तिम् अधिगच्छति इति बोधयति। तथा हि- सर्वभूतानि आत्मवत् पश्यति। सर्वत्र आत्मनः व्याप्तिम् अवगच्छति। आत्मनः अतिरिक्तम् किमपि तस्य न भासते। यत्र आत्मनः अतिरिक्तं किमपि न अस्ति,सर्वम् अपि आत्मैव अभूत् तदा कं प्रतिशोचति, कं प्रति मुह्यति, तथा सर्वत्र आत्मानम् अनुपश्यतः उपासकस्य,शोक-मोहयोः अनुभवाय अवकाशः न भवति।

| |
|---|
| **स्वावलोकनप्रश्नाः**<br>१.आत्मज्ञानसम्पन्नस्य किमर्थं शोकमोहौ न भवतः ? |

**३.२.६.आत्मनोः स्वरूपस्य ज्ञापनम्**

**स पर्यगाच्छुक्रमकायमव्रणमस्नाविरगं शुद्धमपापविद्धम्**
**कविर्मनीषी परिभूः स्वयम्भूर्यथातथ्यतोऽर्थान् व्यवधाच्छाश्वतीभ्यः समाभ्यः।।८।।**

**मन्त्रपरिचयः** :- वेदाः ऋक्-यजुष्-साम-अधर्वणाख्याः चत्वारः।तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति। तत्र वेदानाम् अन्तः भागः उपनिषद् भवति।चतुर्णां वेदानां प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्,(वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिम-अध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः** :- आत्मनः स्वरूपं ज्ञापयन् अयं भागः ईशावास्योपनिषदि सप्तमः मन्त्रः।

**मन्त्रपदविभागः** - सः, पर्यगात्, शुक्रम्, अकायम्, अस्नाविरम्, शुद्धम्, अपापविद्धम्। कविः, मनीषी, परिभूः, स्वयम्भूः, याथातथ्यतः, अर्थान्, व्यवधात् ,शाश्वतीभ्यः, समाभ्यः।।

**मन्त्रस्य अन्वयः-** सः, स्वयम्भूः, पर्यगात्, अकायम्, अस्नाविरम्, अपापविद्धम्, शुक्रम्, अव्रणम्, शुद्धम्, कविः, मनीषी, परिभूः, सः, याथातथ्यतः, शाश्वतीभ्यः, समाभ्यः, अर्थान्, व्यवधात्।

**मन्त्रस्य प्रतिपदार्थः** :- सः = आत्मा; स्वयम्भूः = सङ्कल्पमहिम्नैव जातः; पर्यगात् = परितः व्याप्तः; अकायम् = शरीरहीनः; अस्नाविरम् = मांसरहितः; अपापविद्धम् = निष्कल्मषः; शुक्रम् = उज्ज्वलः; अव्रणम् = अक्षतः; शुद्धम् = पवित्रः; कविः = चतुरः; मनीषी= बुद्धिसम्पन्नः; परिभूः = परितः जननम् आप्तुं समर्थः; सः = तादृशमहिमोपेतः आत्मा; याथातथ्यतः = यथातथरूपेण; शाश्वतीभ्यः = अनादिकालप्रवाहप्रयातेभ्यः; समाभ्यः = प्रजापतिभ्यः; अर्थान् = निर्वहणविधीन्; व्यदधात् = व्यतरत्;

**मन्त्रभावः-** प्रभावपूर्णः अयम् आत्मा सङ्कल्पमहिम्नैव जायते, न तु कारणतः जननम् आप्नोति। सर्वव्यापकः, अयं शरीरधारी न, अतः एव मांसलः अपि न भवति। अयं न दुरालोचनापरः पापी न, अयं निष्कल्मषः,तेजस्वी। कदापि क्षतः न भवति, पवित्रान्तः करणः। वास्तवान् चतुरतया आविष्करोति। बुद्धिसम्पन्नः विवेचनशीलः। परितःउ यत्र कुत्रापि जननम् आप्तुम् समर्थः। एतादृशमहिमोपेतः आत्मैव अनादिकालप्रवाहप्रयातेभ्यः प्रजापतिभ्यः निर्वहणाविधीन् अकल्पयत्।

**स्वावलोकनप्रश्नाः**

१.आत्मा 'स्वयम्भूः' इत्यस्य अर्थः कः ?

२.आत्मा कीदृशेभ्यः, केभ्यः, कान्, व्यवधात् ?

## ३.३ उपसंहारः

एवम् अत्र आत्मस्वरूपम्, आत्मतत्त्वावबोधनम्, आत्मज्ञानस्य फलं प्रयोजनं च स्पष्टतया अभिवर्णितम्। एतच्च वर्णनं विद्यार्थिनां कृते स्थूलतः आत्मतत्त्वावगाहनाय समर्थं भवति।

## ३.४.अभ्यासः

मन्त्रद्वयं व्याख्यात ?

अ)यस्मिन् सर्वाणि भूतान्यात्म्यैवाभूद्विजानत
तत्र को मोहः कः शोक एकत्वमनुपश्यतः।।

इ)असुर्या नाम ते लोका अन्धेन तमसावृताः
तान् ते प्रत्याभिगच्छन्ति ये के चात्महानो जनाः।।

# UNIT-IV
# आत्मज्ञानसम्पादने विद्या-अविद्ययोः स्थानम्

**संरचना**


४.०.परिचयः

४.१.लक्ष्याणि

४.२.आत्मज्ञानसम्पादने विद्या-अविद्ययोः स्थानम्

४.२.१.विद्या-अविद्योपासनयोः प्रत्येकं निन्दाप्रदर्शनम्

४.२.२.विद्या-अविद्योपासनयोः फलभेदप्रदर्शनम्

४.२.३.विद्या-अविद्ययोः सहोपासनस्य फलप्रदर्शनम्

४.३ .उपसंहारः

४.४.अभ्यासः


## ४.० .परिचयः

आत्मज्ञानसम्पादने विद्या-अविद्ययोः स्थानम् इत्ययं पाठ्यांशः ईशावास्योपनिषदि नवममन्त्रतः आरभ्य द्वादशमन्त्रपर्यन्तं,आहत्य त्रिषु मन्त्रेषु प्रवृत्तः। अत्र च प्रधानतया, विद्या-अविद्योपासनयोः प्रत्येकं निन्दाप्रदर्शनम्, विद्या-अविद्योपासनयोः फलभेदप्रदर्शनम्,विद्या-अविद्ययोः सहोपासनस्य फलप्रदर्शन इत्येते विषयाः अत्र वर्णिताः। एते च विषयाः स्थूलतः आत्मज्ञानं प्रति अवगाहनां कल्पयन्ति।

## ४.१.लक्ष्याणि

मानवः सर्वः अपि आत्मज्ञानसम्पन्नः भवेत्। स्वयम् आत्मोद्धारकः भवेत्। तदर्थं प्रयत्नं च कुर्यात्। तत्र उ प्रयत्नकरणे भागतया एव मानवः पुरुषार्थसाधकः भवति। पुरुषार्थाः धर्म-अर्थ-काम-मोक्षाश्चेति चत्वारः। पुरुषार्थसाधकः भवति इत्युक्ते वेदविहितं कर्म शास्त्रोक्तप्रकारेण कुर्वन् धर्म-अर्थ-काम-मोक्षान् प्राप्नोति। नाम एकस्मिन् कर्मण्येव चत्वारः कोणाः (ANGLES, ASPECTS) भवन्ति। कर्मगतस्य वेदोक्तत्वस्यैव धर्मः इति व्यवहारः। वेदोक्ततत्कर्माचरणद्वारा लब्धं धनम् एव अर्थः भवति।वेदोक्त-तत्कर्माचरणगतम् इष्टमेव कामः भवति। फलम् अन-पेक्ष्य निस्सङ्गतया (DETACHED ATTITUDE) कर्मकरणम् एव मोक्षः भवति। एवं पुरुषार्थसाधकः भूत्वा बहुल- अर्थ साधकं कर्म करोति।

ये कायेन वाचा मनसा आत्मतत्त्वोपासनपराः ते च उत्तमा साधकाः। ते सत्यात्मानं द्रष्टुं प्रभवन्ति।परं ये त्रिकरणशुद्ध्या आत्मानं साक्षात्कर्तुं = आत्मानम् अवगन्तुं न पारयन्ति, ते तु मध्यमाः साधकाः। सत्यात्मानं द्रष्टुं तेषां इतोप्यधिकं तीव्रतरं च उपासनम् आवश्यकम्। ते अपि आत्मतत्त्वोपासनाय वेदविहितकर्मपराः भवन्ति। तत्र उपासकस्य आलोचनविधानं द्विधा भवति। केवलविज्ञानसम्पादनेनैव तृप्तेः भजनम्, केवलकर्माचरणेनैव तृप्तेः भजनम्। वेदविहितयज्ञयागादिकर्मणां केवलविज्ञानसम्पादनेन तृप्तिभजनविधानस्यैव विद्या इति, केवलकर्माचरणेन तृप्तिभजनविधानस्यैव अविद्या इति च व्यवहारः। आत्सज्ञानसम्पादने तयोः स्थानं प्रति चर्चा अत्र भवति। एतत्पाठ्यांशस्य अध्ययनेन-

- विद्यायाः - अविद्यायाश्च स्वरूपं पठितुं पारयति।
- विद्यायाः - अविद्यायाश्च निन्दां लिखितुं प्रभवति।
- विद्यायाः - अविद्यायाश्च फलभेदं भाषितुं समर्थो भवति।
- विद्यायाः - अविद्यायाश्च सहोपासनस्य फलं ज्ञातुं प्रभवति।

## ४.२.आत्मज्ञानसम्पादने विद्या-अविद्ययोः स्थानम्

४.२.१.विद्या-अविद्योपासनयोः प्रत्येकं निन्दाप्रदर्शनम्

**अन्धं तमः प्रविशन्ति योऽविद्यामुपासते**
**ततो भूय इव ते तमो य उ विद्यायां रताः।। ९।।**

**मन्त्रपरिचयः** :- वेदाः ऋक्-यजुष्-साम-अधर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति। तत्र वेदानाम् अन्तः भागः उपनिषद् भवति। चतुर्णां वेदानां प्रत्येकशः उपनिषदः भवन्ति। उपनिषदः,दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्, (वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिम-अध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः** :- सत्कार्याणि कुर्वन्तो वा, यज्ञयागादिकम् अनुतिष्ठन्तो वा, ये शाश्वतं जीवितुम् इच्छन्ति तेषां जीवनस्य मूल्याङ्कनं निरूपयन् अयं भागः ईशावास्योपनिषदि नवमः मन्त्रः।

**मन्त्रपदविभागः** :- अन्धम्, तमः, प्रविशन्ति, ये, अविद्याम्, उपासते,। ततः ,भूयः, इव ,ते, तमः, यः, उ, विद्यायाम् ,रताः,।।

**मन्त्रस्य अन्वयः :-** ये अविद्याम् उपासते ते अन्धम् तमः प्रविशन्ति।ये उ विद्यायां रताः ते ततः भूयः तमः इव प्रविशन्ति।

**मन्त्रस्य प्रतिपदार्थः :-** ये = उपासकाः ये; अविद्याम् = अज्ञानं वा अवगाहनाहीनं यज्ञकर्म वा; उपासते = आचरन्ति; ते = अनवगाहतया यज्ञकर्मानुष्ठातारः ते उपासकाः; अन्धम् = गाढम् अदर्शनात्मकम्; तमः = अन्धकारम्; प्रविशन्ति = प्राप्नुवन्ति; ये = ये अपरे उपासकाः; उ = तु; विद्यायाम् = देवताज्ञाने (एव); रताः = अभिरताः; ते = (केवलम्) यज्ञतत्त्वविज्ञानिनः ते उपासकाः; ततः = तस्मात् अन्धात्मकात् तमसः; भूयः = बहुतरं तमः एव; प्रविशन्ति = आप्नुवन्ति;

**मन्त्रस्य भावः :-** उपासनं नाम साधनम्। प्रकृतिं प्रति मानवस्य दृक्पथम् एव उपासनं भवति। तत् द्विविधम्; विद्या-उपासम्, अविद्या-उपासनं च इति।तत्र विद्या-उपासनम्; विश्वस्य श्रेयसे, वेदाः सत्कर्माणि उपदिशन्ति। उपदिष्टानां सत्-कर्मणाम् अनुष्ठानाय विधिविधानं च निर्दिशन्ति। सत्कर्मणाम् अनुष्ठानस्य पृष्ठतः विद्यमानां स्फूर्तिं च (च्द्रत्द्धत्य) सूचयन्ति। एवं स्थिते, केचन केवलं सत्कर्माणि आचरन्ति। नाम, एते वेदोक्तं सत्कर्मणां विधिविधानं न जानन्ति। केवलं वेदोक्तानि कर्माणि आचरेत् इति एतावदेव जानन्ति। 'वेदोक्तानि कर्माणि आचरेत्' इति जानन्तिउविदन्ति, इति कारणतः एते विद्या-उपासकाः भवन्ति।

केचन वेदोक्तनां सत्-कर्मणां विधिविधानं जानन्ति। परं सत्कर्मणाम् अनुष्ठानस्य पृष्ठतः विद्यमानां स्फूर्तिं (Spirit) नैव अवगच्छन्तिउनैव विदन्ति। सत्कर्मणाम् अनुष्ठानस्य पृष्ठतः विद्यमानां स्फूर्तिं (Spirit) नैव अवगच्छन्ति = नैव विदन्ति, इति कारणतः एते अविद्योपासकाः भवन्ति।

विद्यायाम् (विधिविधानम् अज्ञात्वा,केवलं यज्ञकर्माचरणम्) ये उपासते, ते विद्योपासकाः गाढम् अन्धकारं प्रविशन्ति। अत्र तु विद्यापदम् आचरणज्ञानशून्यं सिद्धान्तज्ञानं बोधयति। केवलं यज्ञकर्मणाम् एव निर्वर्तनेतृप्यन्ति। तेषां यज्ञकर्मणाम्, शास्त्रे उक्तम् उद्देशं ज्ञातुं प्रयत्नमेव न कुर्वन्ति। यज्ञकर्माणि दम्भार्थम् अपि कुर्वन्ति। राजस- प्रकृतिकाः भवन्ति।

अविद्यायाम् (सत्कर्मणाम् अनुष्ठानस्य पृष्ठतः विद्यमानां स्फूर्तिम् (च्द्रत्द्धत्य) अज्ञात्वा यज्ञकर्मणां विधि- विधानज्ञाने) एव ये रताः, ते अविद्योपासकाः भवन्ति।ते तु, अदर्शनात्मकात् तमसः अपि बहुतरं तमः प्रविशन्ति। अत्र विद्या पदं स्फूर्तिज्ञानरहितं कर्मानुष्ठानं बोधयति।

कर्माचरणेन समं तेषां सम्पूर्णपरिज्ञानाय आवश्यकं स्फूर्तिप्रदं सात्विकजीवनं ते न कदापि प्राप्तुं शक्नुवन्ति। परम्, शास्त्राध्ययनद्वारा जायमानेन सिद्धान्तज्ञानेनैव केवलम् तृप्यन्ति। तथैव कर्म कर्तुं उद्युक्ताः भवन्ति। एते स्फूर्तिज्ञानरहिताः तामसिकाः, सृजनात्मकताहीनाः जडाः भवन्ति।

**स्वावलोकनप्रश्नाः**

१.विद्या नाम का ?

२.अविद्या नाम का ?

**४.२.२.विद्या-अविद्योपासनयोः फलभेदप्रदर्शनम्**

**अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया**
**इति शुश्रुम धीराणां येनस्तद्विचचक्षिरे।।१०।।**

**मन्त्रपरिचयः ;-** वेदाः ऋक्-यजुष्-साम-अधर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति। तत्र वेदानाम् अन्तः भागः उपनिषद् भवति। चतुर्णां वेदानां प्रत्येकशःउपनिषदः भवन्ति। उपनिषदश्च, दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्, (वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिम-अध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः :-** विद्यायाः उपासनस्य, अविद्यायाः उपासनस्य च पृथक् पृथक् फलं अवाप्यते इत्येतदंशं निरूपयन् अयं भागः ईशावास्योपनिषदि दशमः मन्त्रः।

**मन्त्रपदविभागः ;-** अन्यत् , एव, आहुः, विद्यया, अन्यत्, आहुः, अविद्यया,। इति, शुश्रुम, धीराणाम्, ये, नः, तत्, विचचक्षिरे,।।

**मन्त्रस्य अन्वयः ;-** विद्यया अन्यत् आहुः, अविद्यया अन्यत् एव आहुः इति धीराणां शुश्रुम ये नः तत् विचचक्षिरे।

**मन्त्रस्य प्रतिपदार्थः ;-** विद्यया = देवताज्ञानेन; अन्यत् = पृथक् फलम्; आहुः = वदन्ति; अविद्यया = अज्ञानेन वा अवगाहनाहीनेन यज्ञकर्मणा वा; अन्यत् एव = पृथक् एव फलम्; आहुः = वदन्ति; इति = एवम्; धीराणाम् = धीमताम्; शुश्रुम = वयं श्रुतवन्तः; ये = आचर्याः; नः = अस्मभ्यम्; तत् = कर्म च, ज्ञानं च; विचचक्षिरे = व्याख्यातवन्तः;

**मन्त्रभावः-** विद्यायाः फलं पृथक् विद्यते। अविद्यायाश्च च फलं पृथक् विद्यते। विद्यायाः आचरणशून्यं सामान्यं सिद्धान्त- ज्ञानं फलम्। अविद्यायाः अज्ञानेन कृतं यज्ञकर्म फलम्। एवम् आचर्याः यज्ञकर्माणि व्याख्यातवन्तः। यज्ञकर्मणां च सिद्धान्तविज्ञानं च व्याख्यातवन्तः। एवं ज्ञान-कर्मणोः व्याख्याने निष्णातेभ्यः तेभ्यः एव धीमद्भ्यः आचार्येभ्यः, विद्या- अविद्ययोः पृथक् पृथक् फलं भवति। अत्र च 'विद्यया देवलोकः' 'कर्मणा पितृलोकः' इति श्रुतिवचनं च प्रमाणम् इति वयं श्रुतवन्तः इति मन्त्रस्य भावः।

अत्र मन्त्रे विद्यापदं च विज्ञानरूपार्थं ददाति। विज्ञानपदम् आचरणशून्यं केवलं सिद्धान्तज्ञानं बोधयति। तथा च यज्ञ-कर्मणाम् आचरणशून्यं सिद्धान्तज्ञानं विद्या भवति। एवम् एव अत्र मन्त्रे अविद्यापदं च यज्ञादिकं कर्म बोधयति। शास्त्रोक्तं पारमार्थिकम् उद्देशं न जानन्ति। दम्भेन दर्पेण अहङ्कारेण वा यज्ञकर्मणि अनुतिष्ठन्ति। तादृशं यज्ञ कर्म- आचरणम् एव अविद्या भवति। तथा च अविद्या नाम स्फूर्तिं विना अज्ञानेन कृतं यज्ञकर्म भवति।

**स्वावलोकनप्रश्नाः**

१.विद्यायाः फलं किम् ?

२. अविद्यायाः फलं किम् ?

### ४.२.३. विद्या-अविद्ययोः सहोपासनस्य फलप्रदर्शनम्

**विद्यां चाविद्याम् च यस्तद्वेदोभयं सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।।११।।**

**मन्त्रपरिचयः :-** वेदाः ऋक्-यजुष्-साम-अथर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति। तत्र वेदानाम् अन्तः भागः उपनिषद् भवति।चतुर्णां वेदानां प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च, दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्, (वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिम-अध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः :-** विद्या-अविद्ययोः सहोपासनस्य अमरत्वसिद्धिरूपं फलं प्रदर्शयति इत्येतदंशं निरूपयन् अयं भागः ईशावा- स्योपनिषदि एकादशतमः मन्त्रः।

**मन्त्रपदविभागः :-** विद्याम्, च, अविद्याम्, च, यः, वेद, उभयम्, सह,। अविद्यया, मृर्त्युम्, तीर्त्वा, विद्यया, अमृतम्, अश्नुते।।

**मन्त्रस्य अन्वयः-** यः विद्याम् च अविद्याम् च तत् उभयं सह वेद (सः) अविद्यया मृर्त्युं तीर्त्वा, विद्यया अमृतम् अश्नुते।

**मन्त्रस्य प्रतिपदार्थः** यः = उपासकः यः; विद्याम् = देवताज्ञानम्; च = अपि च; अविद्याम् = अज्ञानम् (यज्ञकर्म); च = समुच्चित्य; तत् = तदेतत्; उभयम् = विद्याम् अविद्याम् च द्वयम्; सह = (युगपत्) एकेनैव पुरुषेण अनुष्ठेयम्; वेद = जानाति; (सः = उभयवित् उपासकः;) अविद्यया = अज्ञानेन (यज्ञ) कर्मणा; मृर्त्युं = स्वाभाविकम् कर्म ज्ञानं च; तीर्त्वा = अतिक्रम्य; विद्यया = देवताज्ञानेन; अमृतम् = देवतात्मभावं; अश्नुते = प्राप्नोति;

**मन्त्रभावः-** अत्र मन्त्रे विद्या च विज्ञानं भवति। विज्ञानं च आचरणशून्यं केवलं सिद्धान्तविज्ञानम्। तथा च देवतानां तत्सम्बन्धिनां यज्ञकर्मणां च (आचरणशून्यम्)सामान्यसिद्धान्तविज्ञानं विद्या भवति। एवम् एव अत्र मन्त्रे अविद्या च यज्ञादिकं कर्म। शास्त्रोक्तं पारमार्थिम् उद्देश्यम् अज्ञात्वा,दम्भेन दर्पेण अहङ्कारेण वा यज्ञकर्मणाम् अनुष्ठानं यत् भवति, तस्य अविद्या इति व्यवहारः। अतः अविद्या नाम अज्ञानेन कृतं यज्ञकर्म भवति।

विद्या-अविद्यास्वरूपयोः एवं स्थिते,यः साधकः पुरुषः, विद्याम् अविद्यां च उभयम् समुच्चित्य जानाति, सः पुरुषः अविद्यया = यज्ञकर्मणा अग्निहोत्रादिना मृत्युं तरति। अनन्तरं विद्यया = देवताज्ञानेन च अमृतम् अश्नुते। अत्र मृत्युशब्दः अधर्म-कामादिदोष-जातं स्वाभाविकं

कर्म बोधयति। अमृतशब्दः च देवतात्मभावं बोधयति। अतः सत्कार्यकारी पुण्यपुरुषः अपि अमरत्वसम्पादनाय विद्याम् अविद्यां च उभयम् समुच्चित्य जानीयात्।

**स्वावलोकनप्रश्नाः**

१.अविद्यया किं तरति ?

२.विद्यया किम् अश्नुते ?

## ४.३.उपसंहारः

एवम् अत्र विद्यायाः स्वरूपं जानन्ति। अविद्यायाश्च स्वरूपम् अवगच्छन्ति।विद्यायाः अविद्यायाश्च निन्दांत्मकं फलं ज्ञातुं प्रभवन्ति। विद्यायाः-अविद्यायाश्च सहोपासनस्य फलम् अवगत्य तदाचरणाय च यतन्ते।

## ४.४.अभ्यासः

अ).विद्यायाः-अविद्यायाश्च स्वरूपं विशदयत ?

इ).विद्यायाः-अविद्यायाश्च सहोपासनफलं विवेचयत ?

# UNIT-V
# आत्मज्ञानसम्पादने सम्भूति-असम्भूत्योः स्थानम्

**संरचना**


५.०.परिचयः

५.१.लक्ष्याणि

५.२.आत्मज्ञानसम्पादने सम्भूति-असम्भूत्योः स्थानम्

५.२.१.सम्भूति - असम्भूत्युपासनयोः प्रत्येकं निन्दाप्रदर्शनम्

५.२.२.सम्भूति - असम्भूत्युपासनयोः फलभेदप्रदर्शनम्

५.२.३.सम्भूति - असम्भूत्योः सहोपासनस्य फलप्रदर्शनम्

५.३.उपसंहारः

५.४.अभ्यासः


## ५.०.परिचयः

आत्मज्ञानसम्पादने सम्भूति-असम्भूत्योः स्थानम् इत्ययं पाठ्यांशः ईशावास्योपनिषदि त्रयोदशतममन्त्रतः आरभ्य पञ्चादशमन्त्रपर्यन्तम्, आहत्य त्रिषु मन्त्रेषु प्रवर्तते। अत्र च प्रधानतया,सम्भूति-असम्भूत्युपासनयोः प्रत्येकं निन्दाप्रदर्शनम्, सम्भूति-असम्भूत्युपासनयोः फलभेदप्रदर्शनम्,सम्भूति-असम्भूत्योः सहोपासनस्य फलप्रदर्शनम् इत्येते विषयाः अत्र उपवर्णिताः। एते च विषयाः स्थूलतः क्रमशश्च आत्मज्ञानं प्रति अवगाहनां कल्पयन्ति।

## ५.१.लक्ष्याणि

आत्मानं ज्ञानवन्तं कर्तुं, प्रकृतिं प्रति उपासकस्य आलोचनविधानं द्विविधं भवति। यथातथतया प्रकृतेः एव साक्षात् आराधनम् प्रथमम्। नाम अत्र प्रकृतिः किमपि विकारम् अप्राप्यैव आराध्यते। प्रकृतिः विकृतिम् अगत्वा अव्याकृता वर्तते।यतः अव्याकृता,ततः प्रकृतिः परिणामं न सहते। तत् कारणात् एव तत्र जननादिकमपि न विद्यते। तथा तदुपासनं असम्भूतिः भवति। एवम् असम्भूतिः, अव्याकृता, इत्यादि पदानि समानम् अर्थं बोधयन्ति। उदाहरणार्थं स्थूलतया पृथिवी यथातथतया प्रकृतिः भवति। (EARTH-PRODUCTS) तरुगुल्मादीनि धान्यानि

फलानि लोहादीनि (METALS) धातुजादीनि (MINERALS) सर्वाण्यपि (EARTH-PRODUCTS) पृथिव्याः विकाराणि भवन्ति। एवं स्थिते पृथिव्याः एव उपासनम् असम्भूति-उपासनम् भवति। अविकृतपृथिव्यां सम्भूतिः न भवति खलु।

प्रकृतेः विकारस्य आराधनम् द्वितीयम्। अत्र विकृतान्, विकारम् आप्तान् = परिणामम् आप्तान् ,प्रकृतिपदार्थान् एव आराधयन्ति।नाम आराधनीयत्वेन भावयन्ति। प्रकृतिः विकारम् आप्नोतीत्युक्ते प्रकृतिः सम्भूतिम्उ जननम्, परिणामम् गच्छति इत्यर्थः। अतः एतादृशम् आराधनम् सम्भूत्यात्मकं भवति। विकृतस्य आराधनम् अत्र भवतीति अस्य व्याकृतोपासनम् इति च व्यवहारः अस्ति। अत्र फल-मूल-लोह-धातुजादीनाम् एव आराधनीयता भवति। एतानि सर्वाणि सम्भूतिम्उ जननम्,परिणामम्,विकृतिं प्राप्ताः एव। एवं सम्भूति-असम्भूत्यात्मकम् आलोचनविधानं उपासकस्य गम्यसाधनाय कथम् उपकुरुते इति अत्र विचार्यते। एतत्पाठ्यांशस्य अध्ययनेन-

- सम्भूतेः - असम्भूतेश्च स्वरूपं पठितुं पारयति।
- सम्भूतेः - असम्भूतेश्च निन्दां लिखितुं प्रभवति।
- सम्भूतेः - असम्भूतेश्च फलभेदं वक्तुं समर्थो भवति।
- सम्भूतेः - असम्भूतेश्च सहोपासनस्य फलं ज्ञातुं प्रभवति।

## ५.२.आत्मज्ञानसम्पादने सम्भूति-असम्भूत्योः स्थानम्

५.२.१.सम्भूति-असम्भूत्युपासनयोः प्रत्येकं निन्दाप्रदर्शनम्

**अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते।**
**ततो भूय इव ते तमो य उ संभूत्यां रताः।।१२।।**

**मन्त्रपरिचयः :-** वेदाः ऋक्-यजुष्-साम-अधर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति। तत्र वेदानाम् अन्तः भागः उपनिषद् भवति। चतुर्णां वेदानाम् प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च, दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्,(वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिम-अध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः** :– सम्भूति-असम्भूति-उपासनयोः स्वरूपम्,तयोः प्रत्येकं निन्दनं च निरूपयन् अयं भागः ईशावास्योपनिषदि द्वादशतमः मन्त्रः।

**मन्त्रपदविभागः :-** अन्धम्, तमः, प्रविशन्ति, ये,असम्भूतिम् ,उपासते। ततः, भूयः, इव, ते, तमः, ये, , सम्भूत्याम्, रताः।।

**मन्त्रस्य अन्वयः :-** ये असम्भूतिम् उपासते ते अन्धम् तमःप्रविशन्ति।ये उ सम्भूत्याम् रताः ते ततः भूयः इव तमः प्रविशन्ति

**मन्त्रस्य प्रतिपदार्थः :-** ये = उपासकाः ये; असम्भूतिम् उप्रकृतिम्; उपासते = अर्चयन्ति; ते = प्रकृत्युपासकाः ते; अन्धम् = गाढम् अदर्शनात्मकम्; तमः = अन्धकारम्; प्रविशन्ति = प्राप्नुवन्ति; ये = उपासकाः ये; उ = तु; सम्भूत्याम् = हिरण्यगर्भाख्ये कार्यब्रह्मणि; रताः = अभिरताः; ते = कार्यब्रह्मोपासकाः ते; ततः = तस्मात् अन्धात्मकात् तमसः; भूयः = बहुतरम्; तमः इव = अन्धकारम् एव; प्रविशन्ति = प्राप्नुवन्ति;

**मन्त्रभावः** :- सम्भवनम्उ सम्भूतिः,सा (उ सम्भूतिः) यस्य कार्यस्य सा सम्भूतिः, तस्याः भिन्ना असम्भूतिः, इति असम्भूति- पदस्य व्युत्पत्तिः। प्रकृतिः अथवा माया वा इत्यर्थः। इमाम् असम्भूतिं ये उपासते ते गाढम् अन्धकारं प्रविशन्ति। सम्भूतिः सम्भवात्मकधर्मवान्।ब्रह्मणः प्रथमा सम्भूतिःउ अभिव्यक्तिः हिरण्यगर्भः।अत एव हिरण्यगर्भः सम्भूतिशब्देन उच्यते। हिरण्यगर्भस्यैव ब्रह्मा, कार्यब्रह्मा, सूत्रात्मा इति व्यवहारः। एवं सम्भूत्याम् उ ये रताः ते तु अदर्शनात्मकात् तमसः अपि बहुतरं तमः प्रविशन्ति।

**स्वावलोकनप्रश्नाः**

१.सम्भूतिः नाम का ?

२. असम्भूतिः नाम का ?

**५.२.२.सम्भूति-असम्भूत्युपासनयोः फलभेदप्रदर्शनम्**

**अन्यदेवाहुः संभवादन्यदाहुरसंभवात्।**
**इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे।।१३।।**

**मन्त्रपरिचयः** :- वेदाः ऋक्-यजुष्-साम-अधर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति। तत्र वेदानाम् अन्तः भागः उपनिषद् भवति। चतुर्णां वेदानां प्रत्येकशःउपनिषदः भवन्ति। उपनिषदश्च, दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्,(वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिम-अध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः** :- सम्भूति-असम्भूत्युपासनयोः पृथक् पृथक् फलं प्रदर्शयति इत्यंशस्य निरुपणावसरे अयं भागः ईशावास्यो- पनिषदि त्रयोदशतमः मन्त्रः।

**मन्त्रपदविभागः -** अन्यत् ,एव ,आहुः ,सम्भवात् ,अन्यत्, आहुः,असम्भवात्। इति, शुश्रुम, धीराणाम्, ये, नः, तत्, विचचक्षिरे,।।

**मन्त्रस्य अन्वयः :-** सम्भवात् अन्यत् एव आहुः, असम्भवात् अन्यत् आहुः, इति धीराणाम् शुश्रुम ये न तत् विवचक्षिरे।

**मन्त्रस्य प्रतिपदार्थः** :- सम्भवात् = सम्भूत्युपासनात् (कार्यब्रह्मोपासनात्); अन्यत् एव = पृथक् एव फलम्; आहुः = वदन्ति; असम्भवात् = असम्भूत्युपासनात् (प्रकृत्युपासनात्); अन्यत् = पृथक् फलम्; आहुः = वदन्ति; इति = एवम्; धीराणाम् = धीमताम्; शुश्रुम = वयं श्रुतवन्तः; ये = आचार्याः ये; नः = अस्मभ्यम्; तत् = सम्भूतिम् असम्भूतिम् च; विचचक्षिरे = व्याख्यातवन्तः;।

**मन्त्रभावः :-** सम्भूतेः फलं पृथक् विद्यते। असम्भूतेश्च च फलं पृथक् विद्यते। सम्भवात् = सम्भूतेः = कार्यब्रह्मोपासनात् अणिमादि-ऐश्वर्यलक्षणं फलं जायते। असम्भवात् = असम्भूतेः= अव्याकृतोपासनात् प्रकृतिलयात्मकं फलं जायते। एवम् आचर्याः कार्यब्रह्माणं व्याख्यातवन्तः। प्रकृतिं च व्याख्यातवन्तः। एवं प्रकृति-कार्यब्रह्माणोः व्याख्याने निष्णातेभ्यः तेभ्यः एव धीमद्भ्यः आचार्येभ्यः, प्रकृति-कार्यब्रह्माणोः पृथक् पृथक् फलं भवति, इति वयं श्रुतवन्तः इति मन्त्रस्य भावः।

अत्र मन्त्रे असम्भूतिपदस्य प्रकृतिः अथवा सृष्टेः पूर्वं विद्यमाना अविकृतावस्था वा अर्थः। अतः एव असम्भूत्युपासनस्य अव्याकृतोपासनम् इति प्रसिद्धिः अस्ति। सम्भूतिः सम्भव-शीली। ब्रह्मणः प्रथमः सम्भवः उअभिव्यक्तिः हिरण्यगर्भः। अत एव हिरण्यगर्भः सम्भूतिशब्देन उच्यते। हिरण्यगर्भस्यैव ब्रह्मा, कार्यब्रह्मा, सूत्रात्मा इति व्यवहारः।

**स्वावलोकनप्रश्नाः**

१.सम्भूतेः फलं किम् ?

२. असम्भूतेः फलं किम् ?

### ५.२.३.सम्भूति - असम्भूत्योः सहोपासनस्य फलप्रदर्शनम्

**सम्भूतिं च विनाशं च यस्तद्वेदोभयम् सह।**
**विनाशेन मृत्युं तीर्त्वाम्संभूत्याऽमृतमश्नुते।१४।।**

**मन्त्रपरिचयः :-** वेदाः ऋक्-यजुष्-साम-अधर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति।तत्र वेदानाम् अन्तः भागः उपनिषद् भवति। चतुर्णां वेदानां प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। शुक्लयजुर्वेदसंहितायाः अन्तिम-अध्या- यस्यैव ईशावास्योपनिषद् इति व्यवहारः। अस्याः एव मन्त्रोपनिषत्,(वाजसनेय) संहितोपनिषत् इति च नामान्तरे स्तः।

**मन्त्रसन्दर्भः :-** सम्भूति-असम्भूत्योः सहोपासनस्य क्रमेण अमरत्वसिद्धिरूपं फलम् प्रदर्शयन् अयं भागः ईशावास्योपनिषदि चतुर्दशतमः मन्त्रः।

**मन्त्रपदविभागः :-** (अ)सम्भूतिं च विनाशं च यः तत् वेदोभयं सह। विनाशेन मृत्युं तीर्त्वा सम्भूत्या अमृतमश्नुते।।

**मन्त्रस्य अन्वयः :-** यः (अ) सम्भूतिम् च विनाशं च सह तत् उभयम् वेद(सः) विनाशेन मृत्युं तीर्त्वा असम्भूत्या अमृतम् अश्नुते।

**मन्त्रस्य प्रतिपदार्थः** :- यः = यः उपासकः; (अ) सम्भूतिम् = प्रकृत्युपासनम्; च = अपि च; विनाशम् = कार्यब्रह्मोपासनम्; च = समुच्चित्य; तत् = (अ) सम्भूतिम् विनाशम् च; उभयम् = द्वयम्; सह = (युगपत्) एकेनैव पुरुषेण अनुष्ठेयम्; वेदउ जानाति; (सः = उभयवित् उपासकः;); विनाशेन = कार्यब्रह्मोपासनेन; मृत्युम् = अधर्मकामादिदोषजातमं मरणम्; तीर्त्वा = अतीत्य; असम्भूत्या = प्रकृत्युपासनेन; अमृतम् = प्रकृतिलयम्; अश्नुते = प्राप्नोति।

**मन्त्रभावः :-** अत्र मन्त्रे असम्भूतिपदस्य प्रकृतिः अथवा सृष्टेः पूर्वं अविकृतरूपेण विद्यमाना माया वा अर्थः। अत एव असम्भूत्युपासनस्य अव्याकृतोपासनम् इति प्रसिद्धिः अस्ति। असम्भवात् = असम्भूतेः = अव्याकृतोपासनात् प्रकृतिलयात्मकं फलम् जायते।

विनाशः, धर्मः यस्य कार्यस्य सः,इत्येवं तेन धर्मिणा अभेदेन उच्यते विनाश इति। एवमत्र विनाशशब्दः सम्भूतिमेव परामृशति। सम्भूतिः सम्भवशीली। अत्र च प्रथमः सम्भवः स्वीक्रियते। ब्रह्मणः प्रथमः सम्भवः च = अभिव्यक्तिः हिरण्यगर्भः। अत एव हिरण्यगर्भः सम्भूतिशब्देन उच्यते। हिरण्यगर्भस्यैव ब्रह्मा,कार्यब्रह्मा, इति व्यवहारः। तत्र सम्भवात्मकं हि नश्वरम् विकारशीलं व्याकृतं च भवति । सम्भवात् = सम्भूतेः = कार्यब्रह्मोपासनात् अणिमादि-ऐश्वर्यलक्षणं फलं जायते।

सम्भूति-असम्भूतिस्वरूपयोः एवं स्थिते,यः साधकः पुरुषः, सम्भूतिम्, असम्भूतिं च उभयम् समुच्चित्य, जानाति सः पुरुषः सम्भूत्या = कार्यब्रह्मोपासनात् लब्धेन अणिमादि-ऐश्वर्यलक्षणेन मृत्युं तरति। अनन्तरम् असम्भूत्याउ प्रकृतिल- यात्मकेन च अमृतम् अश्नुते। अत्र मृत्युशब्दः अनैश्वर्यादिकम्, अमृतशब्दः प्रकृतिलयात्मकं भावं च परामृशति। अतः सत्कार्यकारी पुण्यपुरुषः अपि अमरत्वसम्पादनाय सम्भूतिम् असम्भूतिं च उभयम् समुच्चित्य जानीयात्।

**स्वावलोकनप्रश्नाः**

१.असम्भूत्या किं तरति ?

२. सम्भूत्या किम् अश्नुते ?

## ५.३.उपसंहारः

एवम् अत्र सम्भूतेः स्वरूपं जानन्ति। असम्भूतेश्च स्वरूपम् अवगच्छन्ति।सम्भूतेः-असम्भूतेश्च निन्दात्मकं फलं ज्ञातुं प्रभवन्ति।सम्भूतेः असम्भूतेश्च सहोपासनस्य फलम् अवगत्य तदाचरणाय च यतन्ते।

## ५.४.अभ्यासः

अ). सम्भूतेः असम्भूतेश्चस्वरूपं विशदयत?

आ). सम्भूतेः असम्भूतेश्च सहोपासनफलं विवेचयत ?

# UNIT-VI
# आसन्नमरणस्य आदित्यं प्रति प्रार्थनम्

**संरचना**

६.०.परिचयः
६.१.लक्ष्याणि
६.२. आदित्यं प्रति आसन्नमरणस्य प्रार्थनम्
 ६.२.१.सत्यदर्शनाय सूर्यदेवस्य प्रार्थनम्
 ६.२.२.सोऽहमस्मि' इति महावाक्यावतरणम्
 ६.२.३.मरणसमये उपासकस्य प्रार्थनम्
 ६.२.४.सुपथा नयनाय उपासकस्य प्रार्थनम्
६.३.उपसंहारः
६.४.अभ्यासः

## ६.० .परिचयः

'आदित्यं प्रति आसन्नमरणस्य प्रार्थनम् 'इत्ययं पाठ्यांशः ईशावास्योपनिषदि पञ्चदशतममन्त्रतः प्रारभ्य ग्रन्थान्तं नाम अष्टादशतममन्त्रं (१५-१८)प्रवर्तते। कश्चित् उपासकः क्वचित्, विवेकहीनः सन्, वेदविहितकर्म करोति। क्वचित् आन्तर्यम् अज्ञात्वा वेदविहितयज्ञयागादिकं करोति। क्वचित् भगवदर्पणबुद्धिं विना वेदविहितकर्म आचरति। आत्मसाक्षात्कारसम्पादने एतत् द्वयमपि प्रतिबन्धकमेव भवति। भविष्यत्-जन्मनि अपि वा एवम् अविधाय सत्यात्मानं दर्शयितुम् अग्निं प्रति उपासकस्य प्रार्थना अत्र विद्यते। अत्र सत्यदर्शनाय सूर्यदेवं प्रति उपासकस्य प्रार्थनं विद्यते। आदित्यमण्डलस्थं पुरुषं आत्मानम् भावयति। सोऽहमस्मि' इति निवेदयति, कृतस्य शुभकर्मणः स्मरणाय , सुपथाउ देवयानेन, नयनाय च उपासकस्य प्रार्थनम् अत्र वर्णितम्।

## ६.१.लक्ष्याणि

परिनिष्ठितः उपासकः जगति सर्वत्र परब्रह्मणःउ आत्मनः, व्याप्तत्वम् अवगच्छति। आत्मवत् सर्वभूतेषु प्रवर्तते। आत्मतत्वं चिन्तयति। आत्मसाक्षात्कारं प्राप्नोति। आत्मानन्दम् अनुभवति। अपरिनिष्ठितस्तु आत्मावबोधनम् = आत्मनः साक्षात्कारं न लभते। तथापि सः

वेदविहितम् आचरति एव। क्वचित् विद्यया, क्वचित् अविद्यया, क्वचित् सम्भूत्या, क्वचित् असम्भूत्या च (आलोचनविधया)कर्मसु प्रवर्तते। एवम् उपासकः अपरिणितविवेकः सन् आत्मानम् अवगन्तुम् असमर्थः साधनं कुर्वन्त्येव। क्रमेण आसन्नमृत्युश्च भवति। आगामिनि जन्मनि अपि वा आत्मानम् अवबोद्धुम् अर्हं ज्ञानं दातुं पुनःपुनः आदरेण आदित्यं प्रार्थयति अस्मिन् भागे। एतत् पाठ्यांशस्य अध्ययनेन-

- विश्ववस्तुषु सर्वत्र सत्यम् आच्छादितं सत् विद्यते इति वक्तुं प्रभवति।
- सूर्यदेवस्य महिमानं लिखितुं समर्थो भवति।
- आसन्नमृत्योः उपासकस्य आत्मतत्वावबोधनं प्रति आसक्तिं पठितुं पारयति।
- आसन्नमृत्योः उपासकस्य आत्मज्ञानसम्पदनं प्रति निबद्धतां श्रोतुं समर्थो भवति।

## ६.२.आसन्नमरणस्य आदित्यं प्रति प्रार्थनम्

### ६.२.१.सत्यदर्शनाय सूर्यदेवस्य प्रार्थनम्

**हिरण्मयेन पात्रेण सत्यास्यापिहितं मुखम्**
**तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।१५।।**

**मन्त्रपरिचयः :-** वेदाः ऋक्-यजुष्-साम-अथर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति। तत्र वेदानाम् अन्तः भागः उपनिषद् भवति। चतुर्णां वेदानां प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च, दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्,(वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिमाध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः :-** उपासकाः यावज्जीवं वेदविहितकर्माणि आचरन्ति। मृत्यौ च आसन्ने सति ते सूर्यदेवं प्रार्थयन्ति। तत्-प्रार्थनां निरूपयन् अयं भागः ईशावास्योपनिषदि पञ्चादशतमः मन्त्रः।।

**मन्त्रस्य पदविभागः** :- हिरण्मयेन, पात्रेण, सत्यस्य, अपिहितम्, मुखम्,। तत्, त्वम्, पूषन्, अपावृणु, सत्यधर्माय, दृष्टये,।।

**मन्त्रस्य अन्वयः :-** हिरण्मयेन, पात्रेण, सत्यस्य, मुखम्, अपिहितम्, पूषन्, त्वम्, तत्, सत्यधर्माय, दृष्टये, अपावृणु।

**मन्त्रस्य प्रतिपदार्थः :-** हिरण्मयेन = ज्योतिर्मयेन; पात्रेण = चिल्लिकया (इव);सत्यस्य = वास्तविकरूपस्य सत्यधर्मस्य; मुखम् = द्वारम्; अपिहितम् = आच्छादितम् (अस्ति); पूषन् = पोषक ! हे सूर्यदेव !; त्वम् = सूर्यस्त्वम्; तत् = आच्छादनम्; सत्यधर्माय = यथाभूतस्य धर्मस्य अनुष्ठात्रे मह्यम् (सत्यं धर्मः यस्य सः,सत्यधर्मा ,तस्मै सत्यधर्माय,मह्यम् ); दृष्टये = (तव सत्यात्मनः) उपलब्धये; अपावृणु = अपसारय;।

**मन्त्रभावः :-**'हे भगवन् ! सूर्यदेव ! त्वं सत्यात्मा। अहं च सत्यधर्मानुष्ठाता। तव सत्यात्मा च हिरण्मय (कनक) सदृशेन ज्योति- र्मयेन (तव) कान्तिपात्रेण आच्छादितः। किञ्च त्वं पूषा; अस्माकं पोषकः। भवतः किरणजन्यसंयोगक्रियाद्वारा भवान् विश्व- वस्तुषु पौष्टिकतां (FILL) पूरयसि। तानि च अस्मान् पोषयन्ति। तादृशस्त्वं दयया सत्यधर्मानुष्ठातुः मम, तव सत्यात्मनः दर्शनाय आच्छादितं कान्त्यात्मकं ज्योतिरूपं हिरण्मयपात्रम् अपसारय'इति उपासकः मरणसमये प्रार्थयति।

**स्वावलोकनप्रश्नाः**

१.सत्यस्य मुखम् केन अपिहितम् ?

२.'तत् त्वम् अपावृणु ' अत्र 'त्वम्' कः ?

### ६.२.२.' सोऽहमस्मि ' इति महावाक्यावतरणम्

**पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह।**
**तेजोयत् ते रूपं कल्याणतमं तत् ते पश्यामि योऽसावसोऽहमस्मि।।१६।।**

मन्त्रपरिचयः;वेदाः ऋक्-यजुष्-साम-अथर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति।तत्र वेदानाम् अन्तः भागः उपनिषद् भवति।चतुर्णां वेदानाम् प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च, दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्,(वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिम-अध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः :-** केचन उपासकाः आत्मानम् सगुणम् आराधयन्ति। जीवितान्तं वेदविहितकर्माणि आचरन्ति।ते मृत्यौ आसन्ने सति, सत्पथा नेतुं सूर्यं प्रार्थयन्ति। आदित्यमणडलस्थेन ब्रह्मणा आत्मनः अभेदं वर्णयन्ति। तस्मिन् सन्दर्भे स्थितः अयम्, ईशावास्योपनिषदि षोडशतमः मन्त्रः।

**मन्त्रपदविभागः :-** पूषन्, एकर्षे, यम, प्राजापत्य,व्यूह,रश्मीन्, समूह। तेजः, यत्, ते, रूपम्, कल्याणतमम्, तत्, ते, पश्मामि, यः, असौ, असौ, पुरुषः, सः, अहम्,अस्मि।।

**मन्त्रस्य अन्वयः :-** पूषन् !एकर्षे! यम! प्राजापत्य! सूर्य! रश्मीन्, व्यूह, तेजः ,समूह, यत्, ते, रूपम्, कल्याणतमम्, तत्, ते, पश्यामि, यः, असौ, सः, अहम्, अस्मि।

**मन्त्रस्य प्रतिपदार्थः :-** पूषन् = जगत्पोषक; एकर्षे = एकान्तगामिन्; यम = संयमनशील; प्राजापत्य = प्रजापतिपुत्र; सूर्य = सरण- स्वभावसूर्यभगवन्; रश्मीन् = स्वान् किरणान्; व्यूह = विगमय; तेजः = तापकं ज्योतिः ; समूह = एकीकुरु; यत् = यस्मात् कारणात्; ते = तव; रूपम् = दर्शनम् (APPEARANCE); कल्याणतमम् = अत्यन्तशोभनम्; तत् = तस्मात् कारणात्; ते = तव (आत्मनः प्रसादात्कल्याणतमम् रूपम्); पश्यामि = द्रष्टुं पारयामि; यः = यश्च; असौ = त्वत्स्थः, (आदित्यमणडलस्थः पुरुषः); सः = सः पुरुषः; अहम् अस्मि = अहम् भवामि;।

**मन्त्रभावः** :-'हे भगवन् ! सूर्यदेव !त्वं जगतः पोषकः।निरालम्बे मार्गे एकाकी सन् गच्छसि। अतः त्वां एकर्षं कथयन्ति। सर्वान् संयमयसि इति केचित् यमं त्वाम् आह्वयन्ति। भवान् स्वयं सरणशीलः। किरणात्मना सरति, जलात्मना सरति, बुद्ध्यात्मना सरति, चैतन्यात्मना सरति, एवं सरतीति सूर्यः सम्पन्नः। प्रजापतेः अपत्यं पुमान् प्राजापत्यस्त्वं प्रजानां संरक्षकः।तादृशस्त्वं, सूर्यभगवन् !किरणान् उपसंहर। तेजः एकीकुरु। अन्यथा अद्भुतं तव सत्यात्मानं द्रष्टुं नपारयामि। भवतः रूपं कल्याणतमम् अत्यन्तं शोभनम्। तव सत्यात्मानः प्रसादादेव एनं रूपं द्रष्टुं समर्थः सम्पन्नः। यतः, योऽसौ तव आदित्यमणडलस्थः व्याहृत्यवयवः पुरुषः, सः अहम् एव अतः अहं त्वां भृत्यवत् न याचे।

**स्वावलोकनप्रश्नाः**

| |
|---|
| १.आदित्यमणडलस्थः व्याहृत्यवयवः पुरुषः कः ? |
| २.' तेजः यत् ते रूपम् कल्याणतमम्'अत्र 'ते ' कं सम्बन्धयति ? |
| **६.२.३.मरणसमये उपासकस्य प्रार्थनम्** |

**वायुरनिलममृतमथेदं भस्मान्तम् शरीरम्**
**ॐ क्रतो स्मर कृतं स्मर क्रतोस्मर कृतम् स्मर।।१७।।**

**मन्त्रपरिचयः :-** वेदाः ऋक्-यजुष्-साम-अधर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण, उपनिषद् भेदेन चत्वारः भागाश्च सन्ति।तत्र वेदानाम् अन्तः भागः उपनिषद् भवति।चतुर्णां वेदानां प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च, दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्, (वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंह्तियाः अन्तिमाध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः :-** मरणसमये उपासकः जीवनकाले स्वयम् आचरितानि शुभकर्माणि स्मर्तुम् मनः चोदयति इत्येतत् अंशस्य बोधकः अयं भागः ईशावास्योपनिषदि सप्तदशतमः मन्त्रः।

**मन्त्रपदविभागः :-** वायुः, अनिलम् ,अमृतम् ,अथ ,इदम् ,भस्मान्तम्, शरीरम्,। ॐ क्रतो, स्मर, कृतम्, स्मर, क्रतो,स्मर, कृतम् ,स्मर।।

**मन्त्रस्य अन्वयः** -अथ वायुः अमृतम् अनिलम् (प्रतिपद्यताम्) इदम्, भस्मान्तम्,(भूयात्) ओम्.क्रतो ,स्मर,कृतम्, स्मर। क्रतो , स्मर। कृतम्, स्मर।

**मन्त्रस्य प्रतिपदार्थः :-** अथ = इदानीम्; वायुः = प्राणवायुः; अमृतम् = शाश्वतम्; अनिलम् = पञ्च भूतेषु अन्यतमं वायुम् ; (प्रतिपद्यताम्) इदम् = अदः शरीरम्; भस्मान्तम् = अग्नौ हुतम्; (भूयात्) ओम् = ; क्रतो = सङ्कल्पात्मक; स्मर = स्मृतिम् उपगच्छ; कृतम् = आचरितम् शुभम्; स्मर = स्मृतिम् उपगच्छ; क्रतो = अग्ने; स्मर = स्मृतिम् उपगच्छ; कृतम् = अनुष्ठितम् शुभम्; स्मर = भावय;

**मन्त्रभावः :-** मरिष्यतः मम प्राणः (वायुः) देहं त्यक्त्वा अनन्तं सर्वात्मकम् अनिलं प्रतिपद्यताम्।ज्ञन-कर्म संस्कृतम् उत्क्रामतु । अथ इदं शरीरम् अग्नौ हुतं सत् भस्मान्तं भूयात्। हे क्रतो ! सङ्कल्पात्मक !यत् मम स्मर्तव्यं तस्य कालः अयं प्रत्युप- स्थितः। अतः स्मर। अग्ने ! एतावन्तं कालं कृतं स्मर। यन्मया बाल्यात्प्रभृति अनुष्ठितं कर्म तच्च स्मर इति प्राणप्रयाण-समये उपासकः अग्निदेवं प्रार्थयति। अत्यादरेण स्मरणाय मनः चोदयति।

**स्वावलोकनप्रश्नः**

१.'वायुः अनिलम् अमृतम्' अत्र 'अमृतम्' पदस्य अर्थः कः ?

६.२.४.सुपथा नयनाय उपासकस्य प्रार्थनम्

**अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।**
**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम।।१८।।**

**मन्त्रपरिचयः :-** वेदाः ऋक्-यजुष्-साम-अधर्वणाख्याः चत्वारः। तेषां च प्रत्येकतः संहिता, आरण्यक, ब्राम्हण उपनिषद् भेदेन चत्वारः भागाश्च सन्ति। तत्र वेदानाम् अन्तः भागः उपनिषद् भवति।चतुर्णा वेदानां प्रत्येकशः उपनिषदः भवन्ति। उपनिषदश्च, दश अत्यन्तं प्रसिद्धाः। तासु ईशावास्योपनिषद् अन्यतमा प्रथमा च। इयं च शुक्लयजुर्वेदस्य सम्बन्धनी उपनिषद्। अस्याः एव मन्त्रोपनिषत्, (वाजसनेय) संहितोपनिषत् इति नामान्तरे स्तः। शुक्लयजुर्वेदसंहितायाः अन्तिम-अध्यायस्यैव ईशावास्योपनिषद् इति व्यवहारः।

**मन्त्रसन्दर्भः** :- ' दुःखपूरिते अस्मिन् प्रपञ्चे पुनः अनागमनाय उ पुनः अप्रवेशाय,स्वम् उआत्मानं देवयानद्वारा नय' इति उपासकः अग्निं गाढं प्रार्थयति इत्येतदंशं निरूपयन् अयं भागः ईशावास्योपनिषदि अष्टादशतमः मन्त्रः।

**मन्त्रपदविभागः :-** अग्ने, नय, सुपथा, राये, अस्मान्, विश्वानि, देव, वयुनानि, विद्वान्। युयोधि, अस्मत्, जुहुराणम्, एनः, भूयिष्ठान्ते, मनः, उक्तिम्, विधेम।।

**मन्त्रस्य अन्वयः :-** अग्ने अस्मान् राये सुपथा नय देव विश्वानि वयुनानि विद्वान् अस्मत् जुहुराणम् एनः युयोधि ते भूयिष्ठाम् मन उक्तिम् विधेम।

**मन्त्रस्य प्रतिपदार्थः :-** अग्ने = हविर्भुज; अस्मान् = उपासकान्; राये = धनाय (कर्मफलभोगोय); सुपथा = शोभनेन मार्गेण; नय = गमय; देव = हे अग्ने; विश्वानि = सर्वाणि; वयुनानि = कर्माणि; विद्वान् = जानन् (विदन्); अस्मत् = उपासकेभ्यः अस्मभ्यः; जुहुराणम् = वक्रम्, वञ्चनापरञ्च; एनः = पापम्; युयोधि = वियोजय; ते = तुभ्यम्; भूयिष्ठाम् उ अनेकशः; नम उक्तिम् = नमस्कारवचनम्; विधेम = आचरेम;

**मन्त्रभावः :-** देहत्यागिनां कर्मफलभोगाय द्वौ मार्गौ स्तः। तौ च देवयानम्, पितृयानम् इति। तत्र आद्यं देवयानम्, तस्यैव अर्चिमार्गम्, कान्तिमार्गम् इति नामान्तराणि सन्ति। अपरं पितृयानम्, तस्यैव धूमयानम् इति अपरं नाम।देवयानम्, दिवा, शुक्लपक्षः, उत्तरायणम्, संवत्सराः, देवताः, वायुः, सूर्यः, चन्द्रः, विद्युत्, अग्निलोकः, वरुणलोकः, इन्द्रलोकः, प्रजापतिलोकः एततद्वारा गच्छति। अपरं पितृयानम्; धूमः, अथवा तमः रात्रिः, कृष्णपक्षः, संवत्सरः आकाशः एततद्वारा चन्द्रलोकं गच्छति। देवयानम् द्वारा ये प्रयाणं कुर्वन्ति ते पुनः न अत्र आगच्छन्ति। ते आकल्पान्तं ब्रह्मलोके स्थित्वा कल्पान्ते ब्रह्मणा समं ब्रह्मणि लीनाः भवन्ति। पितृयानद्वारा ये प्रयाणं कुर्वन्ति ते यावत्पुण्यं चन्द्रलोके आनन्दम् अनुभवन्ति। ततः परिशिष्टपूर्वकर्मणा सुखदुःखानुभवाय अस्मिन् लोके जननम् यान्ति। देवयान-पितृयानयोः अयं व्यत्यासः वर्तते।

प्रकृते आसन्नमरणः उपासकः कर्मसाक्षिणम् अग्निदेवम् एवं प्रार्थयति-अग्ने ! जननमरणदायकेन दक्षिणेन मार्गेण अहम् एतावत् निर्विण्णः,अलसितः अस्मि।अतः कर्फलभोगरूपधनस्य दानाय,गमन(मरण)-आगमन(जन्म)वर्जितेन शोभनेन मार्गेण मां गमय।जन्मनः प्रभृति कृतानि सर्वाण्यपि त्वं जानासि।अस्मासु कुटिलं वञ्चनात्मकं पापस्वभावं विनशय। ततः वयं विशुद्धास्सन्तः इष्टं प्राप्स्याम। देव !मरणस्य आसन्नत्वात् तव परिचर्याम् अपि कर्तुं न शक्नुमः। अतः तुभ्यं बहुतरं नमस्कार- वचनं विधेम,नमस्कारेण परिचरेम इति।अस्मिन् प्रपञ्चे पुनः अनागमनाय आत्मानं देवयानद्वरा नय इति अग्निं गाढं प्रार्थयति।

**स्वावलोकनप्रश्नाः**

१. 'कर्मफलभोगाय द्वौ मार्गौ स्तः - तौ कौ ?

२.कर्मफलभोगाय केन मार्गेण नेतुं इच्छति ?

## ६.३.उपसंहारः

एवम् विश्ववस्तुषु सर्वत्र आच्छादितं सत् विद्यमानं सत्यम् आत्मानम् अवगच्छति। सूर्यदेवस्य सर्वतोमुखं महिमानं , प्रभावं च जानाति। अपरिनिष्ठितस्य आसन्नमृत्योः उपासकस्य आत्मतत्वा-

वबोधनं प्रति परितपनं मनोगोचरो भवति। आसन्नमृत्योः उपासकस्य आत्मज्ञानसम्पदनं प्रति निबद्धता अपि अत्र ज्ञापिता भवति।

## ६.४.अभ्यासः

अ).आसन्नमृत्युः सूर्यदेवं किं प्रार्थयति?

इ).आसन्नमृत्युः उपासकः कथं मनः आत्मतत्वावबोधने रतं करोति?

# UNIT-VII
# ईशावास्योपनिषत्-व्यासात्मकप्रश्नाः

**संरचना**


७.०.परिचयः

७.१.लक्ष्याणि

७.२.ईशावास्योपनिषत् - व्यासात्मकप्रश्नाः

७.२.१.निराकारोपासकस्य आवश्यकाः प्राथमिकाः विषयाः

७.२.२.आत्मतत्त्वं प्रति अवगाहनम्

७.२.३.आत्मज्ञानसम्पादने विद्या-अविद्ययोः स्थानम्

७.२.४.आत्मज्ञानसम्पादने सम्भूति-असम्भूत्योः स्थानम्

७.२.५.आसन्नमरणस्य आदित्यं प्रति प्रार्थनम्

७.३.उपसंहारः

७.४.अभ्यासः


## ७.०.परिचयः

Diploma in Sanskrit Examination मध्ये , आहत्य पञ्च पत्राणि सन्ति।तत्र इदं चतुर्थं परीक्षापत्रम्। अस्य च शतं (१००) अङ्काः भवन्ति। अत्र च विषयचतुष्टयं भवति।ईशावास्योपरिषत् इत्ययम् अन्यतमः एको विषयः। एतस्य कृते पविंशति (२०) अङ्काः भवन्ति। द्वौ प्रश्नौ वर्तेते। तेषु व्यासात्मकः प्रश्नः अन्यतमः। व्यासात्मकप्रश्नानां (१०) अङ्काः भवन्ति। एकः प्रश्नः समाधातव्यो भवति। तदर्थं विद्यार्थिनां कृते अत्र अभ्यास सम्पादनं भवति।

## ७.१.लक्ष्याणि

प्रतिपाठ्यांशस्यापि अध्ययने विद्यार्थिभिः प्रयोजनद्वयं साधनीयं भवति। तत्र वैयक्तिकं जीवनलक्ष्यम् एकम्। परीक्षा-दृक्पथम् (Examination Point Of View) अपरम्। परीक्षापत्रस्य पाठ्यांशं परीक्षादृष्ट्या अपि अभ्यसनीयं भवति। प्रश्नपत्रे व्यासात्मकप्रश्नलेखनाय आवश्यकः अभ्यासः अत्र सम्पाद्यते। एतत् पाठ्यांशस्य अध्ययनेन -

- संस्कृतभाषायां लेखनकैशलं वर्धितं भवति।
- संस्कृतभाषायां रचनाकैशलं सम्पादितं भवति।
- संस्कृतभाषायाम् आलोचनायै प्रेरणं दत्तं भवति।
- परीक्षादृक्पथं अभ्यसितं भवति,आर्जितं च भवति।
- सम्पूर्णविषयस्य एकमखतः दर्शनं-अवगमनं च सम्पादितं भवति।

### ७.२.१.निराकारोपासकस्य आवश्यकाः प्राथमिकाः विषयाः

**विश्वस्य भगवदाच्छादकत्वभावनम् -** बुद्धिः द्विविधा भवति। आस्तिकता बुद्धिः, नास्तिकता-बुद्धिश्चेति। विश्वं प्रति, प्रकृतिं प्रति च, आस्तिकता- बुद्धि-विभवस्य आलोचनाविधानम् अत्र अभिवर्णितम्।

जगत् शब्दः गम् धातोः निष्पन्नः। गम् धातुश्च गत्यर्थकः। पुनः पुनः गतिशीलकम् इत्यर्थः। अनुक्षणं परि- णामशीलम् इति भावः। अस्मिन् जगति विद्यमानं सर्वम् अनुक्षणं परिणामशीलं परिवर्तनशीलं च। भगवान् च सर्वव्यापकः। तथाहि - परमेश्वरः पञ्चभूतात्मकः, प्रकृतिस्वरूपः, परिवर्तनि संसारे सर्वत्र, सर्वस्मिन् च प्रयोजनरूपेण व्याप्य स्थितः। नाम जगति यत् यत् वस्तु जातम् अस्ति, प्राणिनाम् अवसरपूरणाय तस्मिन् वस्तुनि प्रयोजनरूपेण व्याप्य परमेश्वरः स्थितः इत्यर्थः समायाति। अतः परिवर्तनि संसारे, विद्यमानं वस्तुजातं यावत् प्राणिनाम् अवसरपूरणाय परमेश्वरेण त्यक्तम् उदत्तम्, प्रसादितम् ,अनुगृहीतम्। अतः परमेश्वरप्रसादितेन तेन वस्तुजातेन पोषणं कुर्यात्। तत्रापि परमेश्वरः एकैकस्य प्रत्येकतः अवसरपूर्त्यै एकैकं वस्तु प्रत्येकतया प्रसादित- वान्। प्रत्येकतया प्रसादितेन तेनैव वस्तुजातेन सः सः पोषणं कुर्यात्। प्रसादितात् अन्येन वस्तुजातेन पोषणं नैव कुर्यात्। प्रसादितात् अन्येन वस्तुजातेन पोषणम् अपहरणं भवति। एवम् अयं मन्त्रभागः निराकारोपासनं सूचयति।

**कर्म आयुःकारकम् इति अवगाहनम्**

वेदविहितकर्माणि नित्यकर्माणि, नैमित्तिककर्माणि, काम्यकर्माणि इति प्रधनतः त्रिविधानि भवन्ति। तत्र सन्ध्यावन्दन-अग्निकार्यादीनि नित्यकर्माणि। जाताशौच-मृताशौचादीनि नैमित्तिकानि कर्माणि। यज्ञयागादीनि काम्यकर्माणि। एतानि सर्वाण्यपि कर्माणि विश्वासेन शास्त्रपूर्वकं अनुतिष्ठेत्। यश्च शतवर्षजीवनम् इच्छति सः एवम् एव प्रवर्तेत। तस्य, अस्मात् अन्यः पन्थाः, नास्ति।यश्च विश्वासेन शास्त्रपूर्वकं वेदविहितकर्माणि अनुतिष्ठति तस्य कर्मसु सङ्गः नैव भवति।

निष्कामकर्माचरणशीलताम् अभ्यस्यति। तेन च दुष्कर्मकालुष्यं न लिप्यते। अतः सङ्गहीनस्सन् कर्माणि आचरेत्। निष्कामकर्माचरणपरः च भवेत्।

### ७.२.२.आत्म(ज्ञानं)तत्त्वं प्रति अवगाहनम्

प्राणिषु मानवः अत्युत्तमः।तस्य सौकर्यकारि शरीरम् अस्ति, विवेचनात्मिका बुद्धिः विद्यते, सुखाद्युपलब्धि- साधनं मनश्च वर्तते। इयं च मानवस्य अभ्युदयकारिणी साधनसम्पत्तिः। साधनसम्पत्तेः शक्तयश्च अमोघाः विद्यन्ते। शारीरकशक्तिः, बौद्धिकशक्तिः, मानसिकशक्तिः, आत्मशक्तिश्चेति। तासु च आत्मशक्तिः प्रभावपूर्णा। इयं मानवानाम् आत्मोद्धरणाय आत्मसाक्षात्काराय प्रशान्तजीवनाय आनन्दमयजीवनाय च कल्पते। आत्मशक्तिः प्राथमिकदशायां मानवं आत्मबलसम्पन्नं करोति। आत्मनि विश्वासं पूरयति। मानवं क्रियाशीलं प्रयत्नशीलं च करोति। मानवस्य विवेचनां वर्धयति। औन्नत्यं सम्पादयति। सर्वम् आत्मीयम् भवयति। आत्मीयता च प्रेमभावनां विस्तारयति। सर्वदा आत्मनः उद्धरणाय प्रयतते। कदापि आत्मानं न न्यूनीकरोति। आत्मशक्तिहीनाः केचन भवन्ति। तेषाम् आत्मज्ञानं न भवति। आत्मनः शक्तेः औन्नत्यं नैव जानन्ति। सदा आत्मानं न्यूनीकुर्वन्ति। आत्मनः उद्धरणं प्रति उद्यमनम् एव ते न जानन्ति। आत्मनः साक्षात्कारं प्रति अवगाहनाहीनाः भवन्ति। अरिषड्वर्गाणां वशाः भवन्ति। एवम् आत्मशक्तेः दूरतः स्थित्वा आत्मघातुकाः भवन्ति। एते आत्मघातुकाः काम-क्रोधाभिभूताः भवन्ति। इन्द्रियलोलुपाः भवन्ति। इन्द्रियार्थसुखम् अनुभवन्ति। शाश्वतं मुक्तिमार्गं नैव चिन्तयन्ति। अत एव एते राक्षसजन्मानः भवन्ति। एवं आत्मज्ञानहीनाः सन्तः,आत्मघातुकाः भूत्वा, राक्षसजन्मानः भवन्ति ,ते मरणानन्तरम् पुनः राक्षसगुणान् प्राप्य, तमोलोकान् एव प्राप्नुवन्ति इति भावः। अतः मानवः प्रयत्नेन साधनशीलो भवेत्। आत्मज्ञानसम्पन्नः स्यात्। आत्मवान् भवेत्। आत्मानम् उद्धरेत्।आत्मनः साक्षात्कारं च प्राप्नुयात्। दिव्यलोकान् च साधयेत्। क्रमेण मुक्तिमार्गं च प्रविशेत्।

### आत्मस्वरूपम्-१

ईशावास्योपनिषदि चतुर्थः मन्त्रभागः आत्मस्वरूपम् एवं ज्ञापयति।तथाहि- आत्मा चलनरहितः। अयं सर्वव्यापकः, स्वयं पूर्णश्च। अतः चलितुं न प्रभवति। पर्यवसानतः आत्मा अचलः भवति। किञ्च जगत् सर्वं गतिशीलकम् ,परिणामभूयिष्ठं च। आत्मा तु न गतिशीली,परिणामशाली च। अतः अपि आत्मा चलनरहित एव। भवति। तथापि अयं मनसः अपि वेगवान्। मनः यत्र यत्र गच्छति, आत्मा स्वीय-सर्वव्याप्तता-गुणेन, ज्योति रूपेण च तत्र

तत्र पूर्वमेव अवतिष्ठते इति कृत्वा, अयम् आत्मा मनसः अपि जवीयःउवेगवान् भवति। मनः इन्द्रियेभ्यः अपि सूक्ष्मतमम्। अतः मनसः अपि जवीयः अयम् आत्मा, इन्द्रियाणां सुतराम् अनभिगम्यो भवति। नाम आत्मा इन्द्रियशक्तेः अतीतः। अतः आत्मा कदापि इन्द्रियग्राह्यविषयः न भवति। इन्द्रियाणाम् आत्मानं प्रति वा,आत्मज्ञानं प्रति वा अवगाहनं नैव भवति। अयं नित्यः , कालत्रयवर्ती पदार्थः। स्थिरश्च, सर्वव्यापकत्वात् चलनाय अवकाशो न विद्यते। स्थिरः अपि अयं धावतः विषयान् अतीत्य तिष्ठति।'प्राणो मातरिश्वा' 'अयं वै वायुर्मातरिश्वा' इति ऐतरेयं कथयति। मातरिश्वा नाम प्राणः। प्राणः एव अङ्गानि निर्वहति (EXECUTE) करोति। आत्मा चित्स्वरूपम्। चैतन्यात्मकम् = प्राणशक्त्यात्मकम् इत्यर्थः। अनेनैव चैतन्येन = प्राणशक्त्या, वायुः स्वस्वकार्यकलापं निर्वहति। एवम् आत्मा जीविनां प्राणधारणात्मकं कार्यभारं वहति इत्येवम् आत्मनः स्वरूपम् अत्र किञ्चित् अभिवर्णितम्।

**आत्मस्वरूपम्-२**

ईशावास्योपनिषदि पञ्चमः मन्त्रभागः आत्मगतानां परस्परविरुद्धानां धर्माणाम् विवरणद्वारा आत्मस्वरूप- अवगमनाय प्रयत्नं करोति। तथाहि- अयम् आत्मा सदा चलति ,सदा न प्रचलति च।आत्मा सर्वस्य दूरे तिष्ठति, सर्वस्य समीपे तिष्ठति च। सर्वेषाम् अन्तः वर्तते, सर्वेषाम् बहिश्च वर्तते च। (१) चलनम्-अचलनम् (२)दूरे- समीपयोः अवस्थानम्, (३)अन्तः-बहिश्च वर्तनम्, इत्येवम् अयम् आत्मा परस्परविरुद्धान्, षट् धर्मान् धरति। तस्य अयम् आशयः - आत्मा द्विविधः। जीवात्मा परमात्मा चेति। सोपाधिकः आत्मा जीवात्मा, प्रत्येकं देहम् आश्रित्य तिष्ठति। निरुपाधिकः आत्मा परमात्मा सर्वव्यापकः, स एव नित्यः, स्थिरश्च भवति। यदा अयं वस्तुनिष्ठस्सन् सोपाधिकः भवति, तदा वस्तुनिष्ठं चलनधर्मम्उगतिशीलकताधर्मं प्राप्नोति। तमेवगतिशीलकता धर्मम् आत्मनि = जीवात्मनि आरोप्य आत्मनः चलनधर्माश्रयत्वव्यवहारः।यदा अयं उपाधिरहितस्सन् वर्तते तदा अयं सर्वत्र सम्पूर्णम् आवृत्य सर्वव्यापकः तिष्ठति। तदा चलनायैव न पारयति। सर्वव्यापकत्वेन चलनराहित्यं पुरस्कृत्य निरुपाधिकस्य आत्मनः अचलनधर्माश्रयत्वव्यवहारः। नाम स्वीयनिजकेवलस्थितौ आत्मा विकाररहितस्सन् अचलो भवति। अनवगाहिनाम् विषयासक्तानाम् अविदुषाम् अप्राप्यत्वात् (आत्माज्ञानं) आत्मा बहुदूरे इव वर्तते। सर्वत्र आत्मदर्शनं कुर्वतः प्रज्ञावतः आत्मा प्रत्यक्षतः पार्श्वे अत्यन्तम् अन्तिके एव वर्तते। एवमेव आत्मसाक्षात्कारं प्राप्तः सर्वभूतेषु अन्तः अवस्थितं आत्मानम् अनुपश्यति।तथैव जीवोपाधिकतया पृथक् पृथक्तया देहाश्रितम् बहिः अवस्थितम् आत्मानम् च अनुपश्यति।एवं

चलन-दूरावस्थान-बहिर्वर्तनादयः सोपाधिकस्य आत्मानः धर्माः। अचलन-समीपाव- स्थान-अन्तर्वर्तनादयः निरुपाधिकस्य आत्मानः धर्माः। एवम् उपाधिभेदम् आश्रित्य आत्मनः परस्पर-विरुद्धधर्म- आश्रयत्वम् उक्तम्।

**आत्मैक्यज्ञानस्य फलम्**

आत्मगुणसम्पन्नस्य व्यक्तित्वनिरूपणद्वरा आत्मस्वरूप-ज्ञापनाय प्रयत्नं करोति। तथा हि- आत्मवित् पुरुषः स्वस्मिन् अन्तः अवस्थितम् देहतिरिक्तम् इन्द्रियातिरिक्तम्,मनसः अतिरिक्तम्,प्राणातिरिक्तं च चित्स्वरूपम्आत्मानम् अवगच्छति।तदेव च चैतन्यात्मकम् चित्स्वरूपम् सर्वभूतेषु अधिगच्छति। स्वस्मिन्- स्वभिन्नेषु च विद्यमानं चैतन्यम् एकम् अनुपश्यति। स्वीयचैतन्ये सर्वाणि भूतानि = सर्वभूतानां चैतन्यम्, भावयति। आत्मवत् सर्वभूतेषु प्रवर्तते। सर्वभूतेषुउ सर्वभूतानां चैतन्ये, आत्मनः चैतन्यम्, पश्यति। सर्वभूतानां कष्टं सुखं च आत्मीयं पश्यति। एवम् सर्वभूतेषु अपरिच्छिन्नस्य चैतन्यस्य साक्षात्कारः जायते। चैतन्यस्य ,अनेन साक्षात्कारेण इहलोके समाजे सर्वभूतेषु समभावना जायते। समभावना च भूतेषु सानुभूतिं दयां च जनयति। सानुभूतिः दया च मानवं प्रेमास्पदं करोति। तदेव च समरस-सामाजिक-जीवनाय उपकुरुते। तस्मिन्नेव समये समभावनाप्रयुक्ता सानुभूतिः दया च द्वेषं दहति। द्वेषः स्वार्थबुद्धिकारणतः भवति। स्वार्थबुद्धिश्च पृथक्त्वबुद्धिं जनयति। अतः सर्वभूतेषु समभावना पृथक्त्वबुद्धिं विदार्य, द्वेषस्य अवकाशमेव न ददाति। आत्मज्ञानवैभवेण मानवः अरिषड्वर्गं विजित्य शाश्वतिकीं शान्तिम् अधिगच्छति इति बोधयति।

**७.२.३.आत्मज्ञानसम्पादने विद्या-अविद्ययोः स्थानम्**

विद्या-अविद्योपासनयोः प्रत्येकं निन्दाप्रदर्शनम्

उपासनं नाम साधनम्। प्रकृतिं प्रति मानवस्य हक्पथम् एव उपासनं भवति। तत् द्विविधम्; विद्या-उपासम्, अविद्या-उपासनं च इति।तत्र विद्या-उपासनम्; विश्वस्य श्रेयसे, वेदाः सत्कर्माणि उपदिशन्ति। उपदिष्टानां सत्-कर्मणाम् अनुष्ठानाय विधिविधानं च निर्दिशन्ति। सत्कर्मणाम् अनुष्ठानस्य पृष्ठतः विद्यमानां स्फूर्तिं च (च्द्रत्द्धत्द्य) सूचयन्ति। एवं स्थिते केचन केवलं सत्कर्माणि आचरन्ति। नाम, एते वेदोक्तं सत्कर्मणां विधिविधानं न जानन्ति। केवलं वेदोक्तानि कर्माणि आचरेत् इति एतावदेव जानन्ति। 'वेदोक्तानि कर्माणि आचरेत्' इति जानन्तिउविदन्ति, इति कारणतः एते विद्या-उपासकाः भवन्ति।

केचन वेदोक्तनां सत्-कर्मणां विधिविधानं जानन्ति। परं सत्कर्मणाम् अनुष्ठानस्य पृष्ठतः विद्यमानां स्फूर्तिं (Spirit)नैव अवगच्छन्ति=नैव विदन्ति।सत्कर्मणाम् अनुष्ठानस्य पृष्ठतः विद्यमानां स्फूर्तिं (Spirit)नैव अवगच्छन्ति = नैव विदन्ति, इति कारणतः एते अविद्योपासकाः भवन्ति।

विद्यायाम् (विधिविधानम् अज्ञात्वा,केवलं यज्ञकर्माचरणम्) ये उपासते, ते विद्योपासकाः गाढम् अन्धकारं प्रविशन्ति। अत्र तु विद्यापदम् आचरणज्ञानशून्यं सिद्धान्तज्ञानं बोधयति। केवलं यज्ञकर्मणाम् एव निर्वर्तनेतृप्यन्ति। तेषां यज्ञकर्मणाम्, शास्त्रे उक्तम् उद्देशं ज्ञातुं प्रयत्नमेव न कुर्वन्ति। यज्ञकर्माणि दम्भार्थम् अपि कुर्वन्ति। राजस- प्रकृतिकाः भवन्ति।

अविद्यायाम् (सत्कर्मणाम् अनुष्ठानस्य पृष्ठतः विद्यमानां स्फूर्तिम् (Spirit) अज्ञात्वा यज्ञकर्मणां विधि- विधानज्ञाने) एव ये रताः, ते अविद्योपासकाः भवन्ति।ते तु, अदर्शनात्मकात् तमसः अपि बहुतरं तमः प्रविशन्ति। अत्र विद्या पदं स्फूर्तिज्ञानरहितं कर्मानुष्ठानं बोधयति। कर्माचरणेन समं तेषां सम्पूर्णपरिज्ञानाय आवश्यकं स्फूर्तिप्रदं सात्विकजीवनम् ते न कदापि प्राप्तुं शक्नुवन्ति। परम् शास्त्राध्ययनद्वारा जायमानेन सिद्धान्तज्ञानेनैव केवलम् तृप्यन्ति। तथैव कर्म कर्तुं उद्युक्ताः भवन्ति। एते स्फूर्तिज्ञानरहिताः तामसिकाः। सृजनात्मकताहीनाः जडाः भवन्ति।
विद्या-अविद्योपासनयोः फलभेदप्रदर्शनम्

विद्यायाः फलं पृथक् विद्यते। अविद्यायाश्च च फलं पृथक् विद्यते। विद्यायाः, आचरणशून्यं सिद्धान्तज्ञानं फलम्। अविद्यायाः, अज्ञानेन कृतम्, यज्ञकर्म फलम्। आचर्याः यज्ञकर्माणि व्याख्यातवन्तः। यज्ञकर्मणां च सिद्धान्तविज्ञानं च व्याख्यातवन्तः। एवं ज्ञान-कर्मणोः व्याख्याने निष्णातेभ्यः तेभ्यः एव धीमद्भ्यः आचार्येभ्यः विद्या-अविद्ययोः पृथक् पृथक् फलस्वरूपं ज्ञातम्। 'विद्यया देवलोकः'इति श्रुतिवचनेन विद्यायाः देवलोकः फलम्। 'कर्मणा पितृलोकः' इति श्रुतिवचनेन च अविद्यायाः पितृलोकः फलम् इति मन्त्रस्य भावः।

अत्र मन्त्रे विद्या च विज्ञानं भवति। विज्ञानं च आचरणशून्यं केवलं सिद्धान्तविज्ञानम्। एवम् एव अत्र मन्त्रे अविद्या च यज्ञादिकं कर्म। शास्त्रोक्तं पारमार्थिम् उद्देशम् अज्ञात्वा, दम्भेन दर्पेण अहङ्कारेण वा यज्ञकर्मणि अनुष्ठीयन्ते। अतः अविद्या नाम अज्ञानं वा यज्ञकर्म वा भवति। एवम् अविद्या पदम् अज्ञाने यज्ञकर्म रूपे च अर्थे पर्यवसन्नम्।

**विद्या-अविद्ययोः सहोपासनस्य फलप्रदर्शनम् –**

विद्या-अविद्यास्वरूपयोः एवं स्थिते,यः साधकः पुरुषः विद्याम् अविद्यां च उभयम् समुच्चित्य जानाति सः पुरुषः अविद्यया = यज्ञकर्मणा अग्निहोत्रादिना मृत्युं तरति। अनन्तरं विद्ययाउ देवताज्ञानेन च अमृतम् अश्नुते। अत्र मृत्युशब्दः अधर्मकामादिदोषजातं स्वाभाविकं कर्म ज्ञानं, अमृतशब्दः देवतात्मभावं च परामृशति। अतः सत्-कार्यकारी पुण्यपुरुषः अपि अमरत्वसम्पादनाय विद्याम् अविद्यां च उभयम् समुच्चित्य जानीयात्। एवम् अत्र विद्यायाः स्वरूपम्, अविद्यायाश्च स्वरूपम् अभिवर्णितम्। विद्यायाः अविद्यायाश्च निन्दांत्मकं फलं प्रदर्शितम्। विद्यायाः-अविद्यायाश्च सहोपासनस्य फलं विशदीकृतम्।

**७.२.४.आत्मज्ञानसम्पादने सम्भूति-असम्भूत्योः स्थानम् –**

आत्मानं ज्ञानवन्तं कर्तुं, प्रकृतिं प्रति उपासकस्य आलोचनविधानं द्विविधं भवति। यथातथतया प्रकृतेः एवसाक्षात् आराधनम् प्रथमम्। एषः एव असम्भूतिः भवति । प्रकृतेः विकारस्य आराधनम् द्वितीयम्। अतः एतादृशम् आराधनम् सम्भूत्यात्मकं भवति। सम्भूति-असम्भूत्यात्मकम् आलोचनविधानं उपासकस्य गम्यसाधनाय कथम् उपकुरुते इति अत्र विचार्यते। संभूति - असंभूत्युपासनयोः प्रत्येकं निन्दाप्रदर्शनम्

सम्भवनम् = सम्भूतिः, सा (= सम्भूतिः) यस्य कार्यस्य सा सम्भूतिः , तस्याः भिन्ना असम्भूतिः, इति असम्भूतिपदस्य व्युत्पत्तिः।प्रकृतिः अथवा माया वा इत्यर्थः। इमाम् असम्भूतिं ये उपासते ते गाढम् अन्धकारं प्रविशन्ति।सम्भूतिः सम्भवात्मकधर्मवान् । ब्रह्मणः प्रथमा सम्भूतिः उअभिव्यक्तिः हिरण्यगर्भः। अत एव हिरण्यगर्भः सम्भूतिशब्देन उच्यते ।हिरण्यगर्भस्यैव ब्रह्मा,कार्यब्रह्मा,सूत्रात्मा इति व्यवहारः। एवम् सम्भूत्याम् = ये रताः ते तु अदर्शनात्मकात् तमसः अपि बहुतरं तमः प्रविशन्ति। अस्य च अयम् आशयः। स्वरूपं स्वभावं च अज्ञात्वा अहङ्कारपूर्त्यै ये प्रकृतिम् उपासते ते राजसप्रकृतिकाः भवन्ति। 'जातस्य हि ध्रुवो मृत्युः'इति गीतावचनात् तत्र सम्भवात्मकं हि नश्वरम्। ये नश्वरात्मकं सम्भूतिम् उपासते ते च तामसप्रकृतिकाः भवन्ति।

**संभूति-असंभूत्युपासनयोः फलभेदप्रदर्शनम् –**

सम्भूतेः फलं पृथक् विद्यते। असम्भूतेश्च च फलं पृथक् विद्यते। सम्भवात् उ सम्भूतेःउ कार्यब्रह्मोपासनात् अणिमादि-ऐश्वर्यलक्षणं फलं जायते। असम्भवात् = असम्भूतेः = अव्याकृतोपासनात् प्रकृतिलयात्मकं फलं जायते। एवम् आचर्याः कार्यब्रह्माणं व्याख्यातवन्तः। प्रकृतिं च व्याख्यातवन्तः। एवं प्रकृति-कार्यब्रह्माणोः व्याख्यानेनिष्णातेभ्यः तेभ्यः एव धीमद्भ्यः आचार्येभ्यः प्रकृति-कार्यब्रह्माणोः पृथक् पृथक् फलं भवति इति वयं श्रुतवन्तः इति मन्त्रस्य भावः।

अत्र मन्त्रे असम्भूतिपदस्य प्रकृतिः अथवा सृष्टेः पूर्वं विद्यमाना अविकृतावस्था वा अर्थः। अत एव असम्भूति-उपासनस्य अव्याकृतोपासनम् इति प्रसिद्धिः अस्ति। सम्भूतिः सम्भवशीली। ब्रह्मणः प्रथमः सम्भवः उ अभिव्यक्तिः हिरण्यगर्भः। अत एव हिरण्यगर्भः सम्भूतिशब्देन उच्यते। हिरण्यगर्भस्यैव ब्रह्मा,कार्यब्रह्मा,सूत्रात्मा इति व्यवहारः। अस्य च अयम् आशयः। स्वरूपं स्वभावं च अज्ञात्वा अहङ्कारपूर्त्यै ये प्रकृतिम् उपासते ते राजस- प्रकृतिकाः भवन्ति। 'जातस्य हि ध्रुवो मृत्युः'इति गीतावचनात् तत्र सम्भवात्मकं हि नश्वरम् विकारशीलं व्याकृतं च भवति। ये व्याकृतां सम्भूतिम् उपासते ते च तामसप्रकृतिकाः भवन्ति।

**सम्भूति -असम्भूत्योः सहोपासनस्य फलप्रदर्शनम् –**

असम्भूतिपदस्य प्रकृतिः अथवा सृष्टेः पूर्वं अविकृतरूपेण विद्यमाना माया वा अर्थः। अत एव असम्भूति - उपासनस्य अव्याकृतोपासनम् इति प्रसिद्धिः अस्ति। असम्भवात् = असम्भूतेः = अव्याकृतोपासनात् प्रकृतिलयात्मकं फलं जायते। स्वरूपं स्वभावं च अज्ञात्वा अहङ्कारपूर्त्यै,ये प्रकृतिम् उपासते ते राजसप्रकृतिकाः भवन्ति।विनाशः, धर्मः यस्य कार्यस्य सः, इत्येवं तेन धर्मिणा अभेदेन उच्यते विनाशः इति। एवम् अत्र विनाशशब्दः सम्भूतिम् एव परामृशति। सम्भूतिः सम्भवशीली। अत्र च प्रथमः सम्भवः स्वीक्रियते। ब्रह्मणः प्रथमः सम्भवः च = अभिव्यक्तिः हिरण्यगर्भः। अत एव हिरण्यगर्भः सम्भूतिशब्देन उच्यते। हिरण्यगर्भस्यैव ब्रह्मा, कार्यब्रह्मा, सूत्रात्मा इति व्यवहारः। तत्र सम्भवात्मकं हि नश्वरम् विकारशीलं व्याकृतं च भवति। सम्भवात् = सम्भूतेः = कार्यब्रह्मोपासनात् अणिमादि- ऐश्वर्यलक्षणं फलं जायते।

सम्भूति-असम्भूतिस्वरूपयोः एवं स्थिते,यः साधकः पुरुषः सम्भूति-असम्भूतिं च उभयम् समुच्चित्य जानाति सः पुरुषः सम्भूत्याउ कार्यब्रह्मोपासनात् लब्धेन अणिमादि-ऐश्वर्यलक्षणेन

मृत्युं तरति। अनन्तरम् असम्भूत्याउप्रकृ- तिलयात्मकेन च अमृतम् अश्नुते।अत्र मृत्युशब्दःअनैश्वर्यादिकम्,अमृतशब्दः प्रकृतिलयात्मकं भावं च परामृशति। अतः सत्कार्यकारी पुण्यपुरुषः अपि अमरत्वसम्पादनाय सम्भूतिम् असम्भूतिं च उभयम् समुच्चित्य जानीयात्।

एवम् अत्र सम्भूतेः स्वरूपं जानन्ति। असम्भूतेश्च स्वरूपम् अवगच्छन्ति। सम्भूतेः-असम्भूतेश्च निन्दात्मकं फलं ज्ञातुं प्रभवन्ति। सम्भूतेः असम्भूतेश्च सहोपासनस्य फलम् अवगत्य तदाचरणाय च यतन्ते।

### ७.२.५.आदित्यं प्रति आसन्नमरणस्य प्रार्थनम्, आत्मघातुकानां निन्दनम्

कश्चित् उपासकः विवेकहीनः सन् वेदविहितकर्म करोति। क्वचित् आन्तर्यम् अज्ञात्वा वेदविहितयज्ञयागा- दिकं करोति। क्वचित् भगवदर्पणबुद्धिं विना वेदविहितकर्म आचरति।एतत् द्वयमपि आत्मसाक्षात्कारसम्पादने प्रतिबन्धकमेव भवति। भविष्यत् -जन्मनि अपि वा एवम् अविधाय, सत्यात्मानं दर्शयितुम् अग्निं प्रति, आसन्नमृत्योः उपासकस्य प्रार्थना अत्र विद्यते। आसन्नमरणस्य आदित्यं प्रति प्रार्थनम्

'हे भगवन्! सूर्यदेव! त्वं सत्यात्मा। अहं च सत्यधर्मानुष्ठाता। तव सत्यात्मा च हिरण्मय(कनक)सदृशेन ज्योतिर्मयेन (तव) कान्तिपात्रेण आच्छादितः। किञ्च त्वं पूषा ; अस्माकं पोषकः। भवतः किरणजन्य संयोगक्रिया- द्वारा भवान् विश्ववस्तुषु पौष्टिकतां (FILL) पूरयसि। तानि च अस्मान् पोषयन्ति। तादृशस्त्वं दयया सत्यधर्म- अनुष्ठातुः मम, तव सत्यात्मनः दर्शनाय आच्छादितं कान्त्यात्मकं ज्योतिरूपं हिरण्मयपात्रम् अपसारय ' इति उपासकः मरण समये प्रार्थयति।

### ' सोऽहमस्मि ' इति महावाक्यावतरणम्

-'हे भगवन् ! सूर्यदेव !त्वं जगतः पोषकः। निरालम्बे मार्गे एकाकी सन् गच्छसि। अतः त्वाम् एकर्षं कथयन्ति। सर्वान् संयमयसि इति केचित् यमं त्वां आह्वयन्ति। भवान् स्वयं सरणशीलः। किरणात्मना सरति, जलात्मना सरति, बुद्ध्यात्मना सरति, चैतन्यात्मना सरति, एवं सरतीति सूर्यः सम्पन्नः। प्रजापतेः अपत्यं पुमान् प्राजापत्यः त्वं प्रजानां संरक्षकः। तादृशस्त्वं, सूर्यभगवन् ! किरणान् उपसंहर। तेजः एकीकुरु। अन्यथा अद्भुतं तव सत्य- आत्मानं द्रष्टुं न पारयामि। भवतः रूपं कल्याणतमम् अत्यन्तं शोभनम्। तव सत्यात्मानः प्रसादादेव एनम् रूपं

द्रष्टुं समर्थः सम्पन्नः। यतः, योऽसौ तव आदित्यमणडलस्थः व्याहृत्यवयवः पुरुषः, सः अहम् एव अतः अहं त्वां भृत्यवत् न याचे।

**मरणसमये उपासकस्य प्रार्थनम् –**

मरिष्यतः मम प्राणः(वायुः), देहं त्यक्त्वा अनन्तं सर्वात्मकम् अनिलं प्रतिपद्यताम्। ज्ञन-कर्मसंस्कृतम् उत्क्रामतु । अथ इदं शरीरम् अग्नौ हुतं सत् भस्मान्तं भूयात्। हे क्रतो ! सङ्कल्पात्मक !यत् मम स्मर्तव्यं तस्य कालः अयं प्रत्युपस्थितः। अतः स्मर।अग्ने ! एतावन्तं कालं कृतं स्मर। यन्मया बाल्यप्रभृति अनुष्ठितं कर्म तच्च स्मरतु इति प्राणप्रयाणसमये उपासकः अग्निदेवं प्रार्थयित्वा, अत्यादरेण आत्मानम् स्मरणाय आदिशति।

**सुपथा नयनाय उपासकस्य प्रार्थनम् –**

देहत्यागिनां कर्मफलभोगाय द्वौ मार्गौ स्तः। तौ च देवयानम्,पितृयानम् इति। तत्र आद्यं देवयानम्, तस्यैव अर्चिर्मार्गम्, कान्तिमार्गम् इति नामान्तराणि सन्ति। अपरं पितृयानम्, तस्यैव धूमयानम् इति नामान्तरम्। देवयानम्, दिवा,शुक्लपक्षः,उत्तरायणम्, संवत्सराः, देवताः, वायुः, सूर्यः ,चन्द्रः,विद्युत्, अग्निलोकः, वरुणलोकः , इन्द्रलोकः, प्रजापतिलोकः एततद्वारा गच्छति। अपरं पितृयानं धूमः, अथवा तमः रात्रिः, कृष्णपक्षः, संवत्सरः आकाशः एततद्वारा चन्द्रलोकं गच्छति।देवयानं द्वारा ये प्रयाणं कुर्वन्ति ते पुनः न अत्र आगच्छन्ति।ते आकल्पान्तं ब्रह्मलोके स्थित्वा कल्पान्ते ब्रह्मणा समं ब्रह्मणि लीनाः भवन्ति। पितृयानम् द्वारा ये प्रयाणं कुर्वन्ति ते यावत्पुण्यं चन्द्रलोके आनन्दम् अनुभवन्ति। ततः परिशिष्टपूर्वकर्मणा सुखदुःखानुभवाय अस्मिन् लोके जननं यान्ति। देवयान -पितृयानयोः अयं व्यत्यासः वर्तते।

प्रकृते आसन्नमरणः उपासकः कर्मसाक्षिणम् अग्निदेवम् एवं प्रार्थयति - अग्ने ! जननमरणदायकेन दक्षिणेन मार्गेण अहम् एतावत् निर्विण्णः। अतः कर्मफलभोगरूपधनस्य दानाय गमन(मरण)-आगमन (जन्म) वर्जितेन शोभनेन मार्गेण मां गमय। जन्मनः प्रभृति कृतानि सर्वाण्यपि त्वं जानासि। अस्मासु कुटिलं वञ्चनात्मकं पापस्वभावं विनशयतु। ततः वयं विशुद्धास्सन्तः इष्टं प्राप्स्याम। देव !मरणस्य आसन्नत्वात् तव परिचर्याम् अपि कर्तुं न शक्नुमः। अतः तुभ्यं बहुतरं नमस्कारवचनं विधेम, नमस्कारेण परिचरेम इति। अत्र उपासकः दुःखपूरिते अस्मिन् प्रपञ्चे पुनः अनागमनाय आत्मानं देवयानद्वरा नय इति अग्निं गाढं प्रार्थयति।

एवम् विश्ववस्तुषु सर्वत्र आच्छादितं सत् विद्यमानं सत्यम् आत्मानम् अवगच्छति। सूर्यदेवस्य सर्वतोमुखं महिमानं , प्रभावं च जानाति। अपरिनिष्ठितस्य आसन्नमृत्योः उपासकस्य आत्मतत्वावबोधनं प्रति परितपनं मनो- गोचरो भवति। आसन्नमृत्योः उपासकस्य आत्मज्ञानसम्पदनं प्रति निबद्धता अपि अत्र ज्ञापिता भवति।

## ७.३.उपसंहारः

एवम् अत्र १)निराकारोपासकस्य आवश्यकाः प्राथमिकाः विषयाः,२).आत्मतत्त्वं प्रति अवगाहनम्, ३).आत्मज्ञान सम्पादने विद्या-अविद्ययोः स्थानम् ४).आत्मज्ञानसम्पादने सम्भूति-असम्भूत्योः स्थानम् ५).आसन्नमरणस्य आदित्यं प्रति प्रार्थनम् इत्येवं व्यासात्मकाः विषयाः प्रस्तुताः। सम्पूर्णविषयस्य एकमखतः अवगमनम् च साधितं भवति। संस्कृतवाक्यरचनाविधानं, लेखनविधानं च अभ्यस्तं भवति।

## ७.४.अभ्यासः

अ).ईशावास्योपनिषद् सारांशं लिखत ?

इ).आत्मनः स्वरूपं विशदयत ?